पदपाठसहिता

ऋग्वेद-संहिता

सायणाचार्यकृत-भाष्यसंवलिता

सैव

हिन्दीभाषामन्त्रानुवादसमन्विता

अनुवादक

पण्डित रामगोविन्द त्रिवेदी

।।श्रीः।।

विद्याभवन प्राच्यविद्या ग्रन्थमाला

३५

पदपाठसहिता

ऋग्वेद-संहिता

सायणाचार्यकृत-भाष्यसंवलिता

सैव

हिन्दीभाषामन्त्रानुवादसमन्विता

अनुवादक

पण्डित रामगोविन्द त्रिवेदी

नवमो ऽष्टकः

चौखम्बा विद्याभवन

वाराणसी

चौखम्बा विद्याभवन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069, वाराणसी 221001
दूरभाष : 2420404
ई-मेल : cvbhawan@yahoo.co.in

पुनर्मुद्रित 2007 ई०
१-९ भाग (सम्पूर्ण)
मूल्य : ३५००.००

अन्य प्राप्तिस्थान
चौखम्बा पब्लिशिंग हाउस
4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : 23286537

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113
दिल्ली 110007
दूरभाष : 23856391

चौखम्बा सुरभारती प्रकाशन
के. 37/117, गोपालमन्दिर लेन
पो० बा० नं० 1129, वाराणसी–221 001
दूरभाष–2335263

THE
VIDYABHAWAN PRACHYAVIDYA GRANTHAMALA
35

ṚG-VEDA-SAṀHITĀ

Together with

PADAPĀṬHA
&
SĀYAṆABHĀṢYA

Hindi Translation
by
Pt. Ram Govind Trivedi

NINE AṢṬAKA

CHOWKHAMBA VIDYABHAWAN
VARANASI

Publishers :
CHOWKHAMBA VIDYABHAWAN
(Oriental Publishers & Distributors)
Chowk (Behind Bank of Baroda Building)
Post Box No. 1069
Varanasi 221001
Tel. : 2420404
E-mail : cvbhawan@yahoo.co.in

© All rights reserved
Edition : 2007
Price : Rs. 3500.00

Also can be had from :
CHAUKHAMBA PUBLISHING HOUSE
4697/2, Ground Floor
Gali No. 21-A, Ansari Road
Daryaganj, New Delhi 110002
Tel. : 23286537

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U.A. Bungalow Road, Jawahar Nagar
Post Box No. 2113
Delhi 110007
Tel. : 23856391

CHAUKHAMBA SURBHARATI PRAKASHAN
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
Varanasi 221001
Tel. : 2335263

श्रीगणेशाय नमः

॥ अथ परिशिष्टानि ॥

द्वितीयाष्टकस्य पंचमाध्याये पंचदशवर्गानन्तरं ऋगष्टकं परिशिष्टं

माबिभेर्नमरिष्यसिपरित्वापामिसर्वतः । घनेनहन्मिवृश्चिकमहिं दण्डेनागतं १ आदित्यरथवेगेनविष्णुबाहुबलेनच । गरुडपक्षनिपाते नभूमिंगच्छमहायशाः २ गरुडस्यजातमात्रेणत्रयोलोकाःप्रकंपिताः। प्रकंपितामहीसर्वासशैलवनकानना ३ गगनंनष्टचन्द्रार्कंज्योतिषंनप्रकाशते । देवताभयभीताश्चमारुतोनप्लवायतिमारुतोनप्लवायत्योनमः ४ भोसर्पभद्रभद्रंतेदूरंगच्छमहायशाः। जनमेजयस्ययज्ञान्तेआस्तीकवचनंस्मर ५ आस्तीकवचनंश्रुत्वायःसर्पोननिवर्तते । शतधाभिद्यतेमूर्ध्निशिंशवृक्षफलंयथा ६ नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि । नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः ७ योजरत्कारुणाजातोजरत्कन्यांमहायशाः । तस्यसर्पापिभद्रंतेदूरंगच्छमहायशाः ८ ॥

द्वितीयाष्टकस्य अष्टमाध्याये द्वादशवर्गानन्तरं ऋक्पंचकं परिशिष्टं

भद्रंवददक्षिणतोभद्रमुत्तरतोवद । भद्रंपुरस्तान्नोवदभद्रंपश्चात्कपिंजल १ भद्रंवदपुत्रैर्भद्रंवदगृहेषुच । भद्रमस्माकंनोवदभद्रंनोअभयंवद २ भद्रमधस्तान्नोवदभद्रमुपरिष्टान्नोवद । भद्रंभद्रंनआवदभद्रंनःसर्वतोवद ३ असपत्नःपुरस्तान्नःशिवंदक्षिणतस्कधि । अभयंसततंपश्चाद्भद्रमुत्तरतोगृहे ४ यौवनानिमहयंसिजिग्युषामिवदुन्दुभिः । शकुन्तकप्रदक्षिणंशतपत्राभिनोवद ५ ॥

चतुर्थाष्टकस्य द्वितीयाध्याये पंचविंशतिवर्गानन्तरं एकर्चं परिशिष्टं

जागर्षित्वंभुवनेजातवेदोजागर्षियत्रयजतेहविष्मान्। इदंहविः श्रद्दधानोजुहोमितेनपासिगुह्यंनामगोनाम् १ ॥

चतुर्थाष्टकस्य तृतीयाध्याये तृतीयवर्गान्ते एकर्चं परिशिष्टं

सूक्तान्तेतृणान्यग्नावरण्येवोदकेपिवा । यत्स्तृणैरध्ययनंतदधीतंस्तृणानिभवतेभव । वापीकूपतडागानांसमुद्रंगच्छस्वाहा १ ॥

चतुर्थाष्टकस्य तृतीयाध्याये सप्तमवर्गानन्तरं ऋग्द्वयं परिशिष्टं

स्वस्त्ययनंताक्ष्यमरिष्टनेमिंमहद्भूतंवायसंदेवतानां अमुरघ्नमिन्द्रसखंसमत्सुंबृहद्यशोनावमिवारुहेम १ अंहोमुचंमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचताक्ष्यं । प्रयंतपाणिःशरणंप्रपद्येस्वस्तिसंबाधेभयंनोअस्तु २ ॥

चतुर्थाष्टकस्य चतुर्थाध्याये एकोनत्रिंशतिवर्गानन्तरं एकर्चं परिशिष्टं

वर्षंतुतेविभावरिदिवोअभ्रस्यविद्युतः । रोहन्तुसर्वबीजान्यवब्रह्मद्वीषोजहि १ ॥

चतुर्थाष्टकस्य चतुर्थाध्याये चतुस्त्रिंशद्वर्गानन्तरं इदं सप्तविंशतिऋगात्मकं परिशिष्टं

हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां । चन्द्रांहिरण्मयींलक्ष्मींजातवेदोमआवह १ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं । यस्यांहिरण्यंविन्देयंगामश्वंपुरुषानहं २ अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीं । श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषतां ३ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलन्तींतृप्तांतर्पयन्तीं । पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ४ चन्द्रांप्रभासांयशसाज्वलन्तींश्रियंलोकेदेवजुष्टामुदारां । तांपद्मिनींमींशरणंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणे ५ ॥ ७ ॥ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः । तस्यफलानितपसानुदन्तुमान्तरायाश्चबाह्याअलक्ष्मीः ६ उपैतुमांदेवसखःकी

र्तिश्रमणिनासह । प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे ७ क्षुत्पि
पासामलाज्येष्ठामलक्ष्मींनाशयाम्यहं । अभूतिमसमृद्धिंचसर्वांनिर्णुद
मेगृहात् ८ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं । ईश्वरींसर्वभूतानां
तामिहोपह्वयेश्रियं ९ मनसःकाममाकूतंवाचःसत्यमशीमहि । पशू
नांरूपमन्नस्यमयिश्रीःश्रयतांयशः१०॥२॥कर्दमेनप्रजाभूताभूयिसंभव
कर्दम । श्रियंवासयमेकुलेमातरंपद्ममालिनीं ११ आपःसृजन्तुस्नि
ग्धानिचिक्लीतवसमेगृहे । निचदेवीमातरंश्रियंवासयमेकुले १२ आ
र्द्रांपुष्करिणींपुष्टिंपिंगलांपद्ममालिनीं । चन्द्रांहिरण्मयींलक्ष्मींजातवे
दोमआवह १३ आर्द्रांयःकरिणीयष्टिंसुवर्णांहेममालिनीं । सूर्यांहि
रण्मयींलक्ष्मींजातवेदोमआवह १४ तांमआवहजातवेदोलक्ष्मीमन
पगामिनीं । यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विन्देयंपुरुषानहं
१५॥३॥यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं। सूक्तंपंचदशर्चंचश्री
कामःसततंजपेत् १६ पद्मानने पद्मनिपद्मपत्रेपद्मप्रियेपद्मदलायता
क्षि । विश्वप्रियेविश्वमनोनुकूलेत्वत्पादपद्मंमयिसन्निधत्स्व १७
पद्मानने पद्मऊरूपद्माक्षीपद्मसंभवे । तन्मेभजसिपद्माक्षियेनसौख्यंल
भाम्यहं १८ अश्वदायीगोदायीधनदायिमहाधने । धनंमेजुषतां
देविसर्वान्कामांश्चदेहिमे १९ पुत्रपौत्रधनंधान्यंहस्त्यश्वादिगवे
रथं । प्रजानांभवसीमाताआयुष्मंतंकरोतुमे २० धनमग्निर्धनं
वायुर्धनंसूर्योधनंवसुः । धनमिन्द्रोबृहस्पतिर्वरुणंधनमस्तुमे २१
वैनतेयसोमंपिबसोमंपिबतुवृत्रहा । सोमंधनस्यसोमिनोमह्यंददातुसो
मिनः २२ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः । भवन्ति
कृतपुण्यानांभक्तानांश्रीसूक्तंजपेत् २३ सरसिजनिलयेसरो
जहस्तेधवलतरांशुकगंधमाल्यशोभे । भगवतिहरिवल्लभेमनोज्ञेत्रिभु

वनभूतिकरीप्रसीदमह्यं २४ विष्णुपत्नींक्षमांदेवींमाधवींमाधव प्रियां । लक्ष्मींप्रियसखींदेवींनमाम्यच्युतवल्लभां २५ महादेव्यै चविद्महेविष्णुपत्न्यैचधीमहि । तन्नोलक्ष्मीःप्रचोदयात् ॥ २६ ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानंमहीयते । धनंधान्यंपशुं बहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः २७ ॥ इतिश्रीसूक्तं ॥

चतुर्थाष्टकस्य सप्तमाध्याये विंशतिवर्गानन्तरं इदं ऋक्त्रयं परिशिष्टं

चक्षुश्चश्रोत्रंचमनश्चवाक्चप्राणापानौदेहइदंशरीरं । द्वौप्रत्यंचा वनुलोमौ विसर्गावेतंतंमन्येदशयंत्रमुत्सं १ उरश्चपृष्टिश्चकरौचबा हूजंघेचोरूउदरंशिरश्च । रोमाणिमांसंरुधिरंस्थिमज्जमेतच्छरीरंजल बुद्बुदोपमं २ भ्रुवौललाटेचतथाचकर्णौहनूकपोलौचुबुकस्त थाच । ओष्ठौचदन्ताश्चतथैवजिह्वामेतच्छरीरंमुखरत्नकोशं ३ ॥

पंचमाष्टकस्य तृतीयाध्याये त्रिंशद्वर्गान्ते इदं ऋक्षट्कंपठ्यते

शंवतीःपारयन्त्येतेतंपृच्छन्तिवचोयुजा । अभ्यारंतंयमाकेतुंय एवेदमितिब्रवन् १ भासाकेतुंपरिस्रुतंभारतीर्ब्रह्मवर्धनीः । सं जानानामहीमातायएवेदमितिब्रवत् २ इन्द्रस्तांकिंविभुंप्रभुं भानुनेयंसरस्वतीं । येनसूर्यमरोचयद्येनेमेरोदसीउभे ३ जुषस्वां ग्नेअंगिरःकाण्वंमेध्यातिथिं । मात्वासोमस्यबर्हत्सुतस्यमधुमत्तमः ॥ ४ ॥ त्वमग्नेअंगिरःशोचस्वदेववीतमः । आशंतमशंतमाभिरभि ष्टिभिःशांतिःस्वस्तिमकुर्वत ५ शंनःकनिक्रदद्देवःपर्जन्योअभि वर्षतु । शंनोद्यावापृथिवीशंप्रजाभ्यःशंनएधिद्विपदेशंचतुष्पदे ६ ॥

पंचमाष्टकस्य चतुर्थाध्याये द्वाविंशतिवर्गानन्तरं इदं ऋङ्त्रकंपठ्यते

स्वमःस्वमाधिकरणेसर्वनिष्वापयाजनं । आसूर्यमन्यान्स्वापयद्ध्रू१ह्कं जाग्रियादहं १ अजगरोनामसर्पःसर्पिरविषोमहान् । तस्मि

न्हिसर्पः सुधितस्तेनत्वास्त्वापयामसि २ सर्पः सर्पोऽजगरः सर्पिरविषो-महान् । तस्य सर्पास्तिसधवस्तस्य गाधमशीमहि ३ कालिकोनाम-सर्पोनवनागसहस्रबलः । यमुनह्रदेहसोजातो३ योनारायणवाह-नः ४ यदिकालिकदूतस्य यदिकाःकालिकाद्भयात् । जन्मभूमि-मतिक्रान्तोनिर्विषोयातिकालिकः ५ आयाहीन्द्रपथिभिरीलितेभिर्यज्ञमिमनोभागधेयंजुषस्व । तृप्तांजहुमातुलस्येवयोषाभागस्ते-पैतृष्वसेयीवपामिव ६ यशस्करं बलवन्तंप्रभुत्वंतमेवराजाधिपतिर्बभूव । संकीर्णनागाश्वपतिर्नराणांसुमंगल्यंसततंदीर्घमायुः ७ कर्कोटकोनामसर्पोयोदृष्टीविषउच्यते । तस्यसर्पस्यसर्पत्वंतस्मैसर्पनमोस्तुते ८ नमोऽस्तुसर्पेभ्योयेकेचपृथिवीमनु । येअन्तरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ९ ॥

पंचमाष्टकस्य सप्तमाध्याये चतुर्थवर्गान्तेइयमेकाऋक्पठ्यते

उपप्लवंदमंडूकिवर्षमावदतादुरि । मध्येह्रदस्यप्लवस्यनिगृह्यचतुरः पुरः १

षष्ठाष्टकस्यचतुर्थाध्याये त्रयोदशवर्गानन्तरं अशीतिऋगात्मकंवालखिल्यसंज्ञकंपरिशिष्टं

॥ अथ वालखिल्यम् ॥

अभिप्रदशप्रस्कण्वइन्द्रः प्रागाथं

अभिप्रवःसुराधसमिन्द्रमर्चयथाविदे ।
योजरितृभ्योमघवापुरूवसुःसहस्रेणेवशिक्षति ॥ १ ॥

अभि । प्र । वः । सुऽराधसम् । इन्द्रम् । अर्च । यथा । विदे ।
यः । जरितृऽभ्यः । मघऽवा । पुरुऽवसुः । सहस्रेणऽइव ।
शिक्षति ॥ १ ॥

शतानीकेवप्रजिगातिधृष्णुयाहंतिवृत्राणिदाशुषे ।
गिरेरिवप्ररसाअस्यपिन्विरेदत्राणिपुरुभोजसः ॥ २ ॥

शतानीकाऽइव । प्र । जिगाति । धृष्णुऽया । हन्ति । वृत्राणि । दाशुषे ॥
गिरेःऽइव । प्र । रसाः । अस्य । पिन्विरे । दत्राणि । पुरुऽभोजसः ॥२॥

आत्वासुतासइन्दवोमदायइन्द्रगिर्वणः ।
आपोनवज्रिन्नन्वोक्यंऽसरःपृणन्तिशूरराधसे ॥ ३ ॥

आ । त्वा । सुतासः । इन्दवः । मदाः । ये । इन्द्र । गिर्वणः ॥
आपः । न । वज्रिन् । अनु । ओक्यम् । सरः । पृणन्ति । शूर ।
राधसे ॥ ३ ॥

अनेहसंप्रतरणंविवक्षणंमध्वःस्वादिष्ठमींपिब ।
आयथामन्दसानःकिरासिनःप्रक्षुद्रेवत्मनाधृषत् ॥ ४ ॥

अनेहसम् । प्रऽतरणम् । विवक्षणम् । मध्वः । स्वादिष्ठम् । ईम् । पिब ।
आ । यथा । मन्दसानः । किरासि । नः । प्र । क्षुद्राऽइव । त्मना ।
धृषत् ॥ ४ ॥

आनःस्तोममुपद्रवद्धियानोअश्वोनसोतृभिः ।
यंतेस्वधावन्त्स्वदयन्तिधेनवइन्द्रकण्वेषुरातयः ॥ ५ ॥ १ ॥

आ । नः । स्तोमम् । उप । द्रवत् । हियानः । अश्वः । न । सोतृऽभिः ।
यम् । ते । स्वधाऽवन् । स्वदयन्ति । धेनवः । इन्द्र । कण्वेषु ।
रातयः ॥ ५ ॥ १ ॥

उग्रंनवीरंनमसोपसेदिमविभूतिमक्षितावसुम् ।
उद्रीववज्रिन्नवतोनसिञ्चतेक्षरन्तीन्द्रधीतयः ॥ ६ ॥

उग्रम् । न । वीरम् । नमसा । उप । सेदिम । विऽभूतिम् । अक्षितऽवसुम् ।
उद्रीऽइव । वज्रिन् । अवतः । न । सिञ्चते । क्षरन्ति ।
इन्द्र । धीतयः ॥ ६ ॥

यद्धनूनंयद्वायज्ञेयद्वापृथिव्यामधि ।
अतोनोयज्ञमाशुभिर्महेमतउग्रउग्रेभिरागहि ॥ ७ ॥

यत् । ह । नूनम् । यत् । वा । यज्ञे । यत् । वा । पृथिव्याम् । अधि ।
अतः । नः । यज्ञम् । आशुऽभिः । महेऽमते । उग्रः । उग्रेभिः ।
आ । गहि ॥ ७ ॥

अजिरासोहरयोयेतआशवोवाताइवप्रसक्षिणः ।
येभिरपत्यंमनुषःपरीयसेयेभिर्विश्वंस्वर्दृशे ॥ ८ ॥

अजिरासः । हरयः । ये । ते । आशवः । वाताःऽइव । प्रऽसक्षिणः ।
येभिः । अपत्यम् । मनुषः । परिऽईयसे । येभिः । विश्वम् । स्वः ।
दृशे ॥ ८ ॥

एतावतस्तईमहइन्द्रसुम्नस्यगोमतः ।
यथाप्रावोमघवन्मेध्यातिथिंयथानीपातिथिंधने ॥ ९ ॥

एतावतः । ते । ईमहे । इन्द्र । सुम्नस्य । गोऽमतः ।
यथा । प्र । आवः । मघऽवन् । मेध्यऽअतिथिम् । यथा ।
नीपऽअतिथिम् । धने ॥ ९ ॥

यथाकण्वेमघवत्रसदस्यवियथापक्थेदशव्रजे ।
यथागोशर्येअसनोर्ऋजिश्वनीन्द्रगोमद्धिरण्यवत् ॥ १० ॥ २ ॥

यथा । कण्वे । मघऽवन् । त्रसदस्यवि । यथा । पक्थे । दशऽव्रजे ।
यथा । गोऽशर्ये । असनोः । ऋजिश्वनि । इन्द्र । गोऽमत् ।
हिरण्यऽवत् ॥ १० ॥ २ ॥

प्रसुश्रुतं दश पुष्टिगुरिन्द्रः प्रागाथं

प्रसुश्रुतंसुराधसमर्चाशक्रमभिष्टये ।
यःसुन्वतेस्तुवतेकाम्यंवसुसहस्रेणेवमंहते ॥ १ ॥

प्र । सु । श्रुतम् । सुऽराधसम् । अर्च । शक्रम् । अभिष्टये ।
यः । सुन्वते । स्तुवते । काम्यम् । वसु । सहस्रेणऽइव । मंहते ॥ १ ॥

शतानीकाहेतयोऽअस्यदुष्टराइन्द्रस्यसमिषोमहीः ।
गिरिर्नभुज्मामघवत्सुपिन्वतेयदींसुताअमन्दिषुः ॥ २ ॥

शतऽअनीकाः । हेतयः । अस्य । दुस्तराः । इन्द्रस्य । सम्ऽइषः ।
महीः । गिरिः । न । भुज्मा । मघवत्ऽसु । पिन्वते । यत् । ईम् ।
सुताः । अमन्दिषुः ॥ २ ॥

यदींसुतासइन्दवोभिप्रियममन्दिषुः ।
आपोनधायिसवनंमआवसोदुघाइवोपदाशुषे ॥ ३ ॥

यत् । ईम् । सुतासः । इन्दवः । अभि । प्रियम् । अमन्दिषुः ।
आपः । न । धायि । सवनम् । मे । आ । वसो इति ।
दुघाःऽइव । उप । दाशुषे ॥ ३ ॥

अनेहसंवोहवमानमूतयेमध्वःक्षरन्तिधीतयः ।
आत्वावसोहवमानासइन्दवउपस्तोत्रेषुदधिरे ॥ ४ ॥

अनेहसम् । वः । हवमानम् । ऊतये । मध्वः । क्षरन्ति । धीतयः ।
आ । त्वा । वसो इति । हवमानासः । इन्दवः । उप । स्तोत्रेषु ।
दधिरे ॥ ४ ॥

आनःसोमेस्वध्वरइयानोअत्योनतोशते ।
यंतेस्वदावन्त्स्वदन्तिगूर्तयःपौरेछन्दयसेहवम् ॥५॥३॥

आ । नः । सोमे । सुऽअध्वरे । इयानः । अत्यः । न । तोशते ।
यम् । ते । स्वदाऽवन् । स्वदन्ति । गूर्तयः । पौरे । छन्दयसे ।
हवम् ॥ ५ ॥ ३ ॥

प्रवीरमुग्रंविविचिंधनस्पृतंविभूतिंराधसोमहः ।
उद्रीवंवज्रिन्नवतोवसुत्वनासदापीपेथदाशुषे ॥ ६ ॥

प्र । वीरम् । उग्रम् । विविचिम् । धनऽस्पृतम् । विऽभूतिम् ।
राधसः । महः । उद्रीऽइव । वज्रिन् । अवतः ।
वसुऽत्वना । सदा । पीपेथ । दाशुषे ॥ ६ ॥

यद्ध नूनं पराव्रति यद्वा पृथिव्यां दिवि ।
युजानइन्द्र हरिभिर्महेमत क्रुष्व क्रुष्वेभिरागहि ॥ ७ ॥

यत् । ह । नूनम् । पराऽवति । यत् । वा । पृथिव्याम् । दिवि ।
युजानः । इन्द्र । हरिऽभिः । महेऽमते । क्रुष्वः । क्रुष्वेभिः ।
आ । गहि ॥ ७ ॥

रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ॥ ८ ॥

रथिरासः । हरयः । ये । ते । अस्रिधः । ओजः । वातस्य ।
पिप्रति । येभिः । नि । दस्युम् । मनुषः । निऽघोषयः । येभिः ।
स्वः । परिऽईयसे ॥ ८ ॥

एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥ ९ ॥

एतावतः । ते । वसो इति । विद्याम । शूर । नव्यसः ।
यथा । प्र । आवः । एतशम् । कृत्व्ये । धने । यथा । वशम् ।
दशऽव्रजे ॥ ९ ॥

यथा कण्वे मघवन् मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥ १० ॥ ४ ॥

यथा । कण्वे । मघऽवन् । मेधे । अध्वरे । दीर्घऽनीथे ।
दमूनसि । यथा । गोऽशर्ये । असिसासः । अद्रिऽवः ।
मयि । गोत्रम् । हरिऽश्रियम् ॥ १० ॥ ४ ॥

यथामनौदश श्रुष्टिगुरिन्द्रः प्रागाथं

यथामनौसांवरणौसोममिन्द्रापिबःसुतम् ।
नीपातिथौमघवन्मेध्यातिथौपुष्टिगौश्रुष्टिगौसचा ॥ १ ॥

यथा । मनौ । साम्ऽवरणौ । सोमम् । इन्द्र । अपिबः ।
सुतम् । नीपऽअतिथौ । मघऽवन् । मेध्यऽअतिथौ ।
पुष्टिऽगौ । श्रुष्टिऽगौ । सचा ॥ १ ॥

पार्षद्वाणःप्रस्कण्वंसमसादयच्छयानंजिह्मुद्धितम् ।
सहस्राण्यसिषासद्गवामृषिस्त्वोतोदस्यवेवृकः ॥ २ ॥

पार्षद्वाणः । प्रस्कण्वम् । सम् । असादयत् । शयानम् ।
जिह्मम् । उद्धितम् । सहस्राणि । असिसासत् । गवाम् । ऋषिः ।
त्वाऽऊतः । दस्यवे । वृकः ॥ २ ॥

यउक्थेभिर्नविन्धतेचिकिद्यऋषिचोदनः ।
इन्द्रंतमच्छावदनव्यस्यामत्यरिष्यन्तंनभोजसे ॥ ३ ॥

यः । उक्थेभिः । न । विन्धते । चिकित् । यः । ऋषिऽचोदनः ।
इन्द्रम् । तम् । अच्छ । वद । नव्यस्या । मती । अरिष्यन्तम् ।
न । भोजसे ॥ ३ ॥

यस्मांअर्कंसमशीर्षाणमानृचुस्त्रिधातुमुत्तमेपदे ।
सत्वि१मा विश्वाभुवनानिचिक्रददादिज्जनिष्टपौंस्यम् ॥ ४ ॥

यस्मै । अर्कम् । समऽशीर्षाणम् । आनृचुः । त्रिऽधातुम् ।
उत्ऽतमे । पदे । सः । तु । इमा । विश्वा । भुवनानि ।
चिक्रदत् । आत् । इत् । जनिष्ट । पौंस्यम् ॥ ४ ॥

योनोदातावसूनामिन्द्रंतंहूमहेवयम् ।
विद्माह्यस्यसुमतिंनवीयसींगमेमगोमतिव्रजे ॥ ५ ॥ ५ ॥

यः । नः । दाता । वसूनाम् । इन्द्रम् । तम् । हूमहे । वयम् ।
विद्म । हि । अस्य । सुऽमतिम् । नवीयसीम् । गमेम ।
गोऽमति । व्रजे ॥ ५ ॥ ५ ॥

यस्मैत्वंवसोदानायशिक्षसिसरायस्पोषमश्नुते ।
तंत्वावयंमघवन्निन्द्रगिर्वणःसुतावंतोहवामहे ॥ ६ ॥

यस्मै । त्वम् । वसो इति । दानाय । शिक्षसि । सः । रायः ।
पोषम् । अश्नुते । तम् । त्वा । वयम् । मघऽवन् । इन्द्र ।
गिर्वणः । सुतऽवन्तः । हवामहे ॥ ६ ॥

कदाचनस्तरीरसिनेन्द्रसश्चसिदाशुषे ।
उपोपेन्नुमघवन्भूयइन्नुतेदानंदेवस्यपृच्यते ॥ ७ ॥

कदा । चन । स्तरीः । असि । न । इन्द्र । सश्चसि ।
दाशुषे । उपऽउप । इत् । नु । मघऽवन् । भूयः । इत् ।
नु । ते । दानम् । देवस्य । पृच्यते ॥ ७ ॥

प्रयोननक्षेअभ्योजसाक्रिविंवधैःशुष्णंनिघोषयन् ।
यदेदस्तंभीत्प्रथयन्नमून्दिवमादिज्जनिष्टपार्थिवः ॥ ८ ॥

प्र । यः । ननक्षे । अभि । ओजसा । क्रिविम् । वधैः ।
शुष्णम् । निऽघोषयन् । यदा । इत् । अस्तम्भीत् । प्रथयन् ।
अमूम् । दिवम् । आत् । इत् । जनिष्ट । पार्थिवः ॥ ८ ॥

यस्यायंविश्वआर्योदासःशेवधिपाअरिः ।
तिरश्चिदर्येरुशमेपवीरवितुभ्येत्सोअज्यतेरयिः॥ ९ ॥

यस्य । अयम् । विश्वः । आर्यः । दासः । शेवधिऽपाः ।
अरिः । तिरः । चित् । अर्ये । रुशमे । पवीरवि ।
तुभ्य । इत् । सः । अज्यते । रयिः ॥ ९ ॥

तुरण्यवोमधुमन्तंघृतश्चुतंविप्रासोअर्कमानृचुः।
अस्मेरयिःपप्रथेवृष्ण्यंशवोस्मेसुवानासइन्दवः ॥ १० ॥ ६॥

तुरण्यवः । मधुऽमन्तम् । घृतऽश्चुतम् । विप्रासः । अर्कम् ।
आनृचुः । अस्मे इति । रयिः । पप्रथे । वृष्ण्यम् । शवः । अस्मे
इति । सुवानासः । इन्दवः ॥ १० ॥ ६ ॥

यथामनौ दशायुरिन्द्रः प्रागाथं

यथामनौविवस्वतिसोमंशक्रापिबःसुतम् ।
यथात्रितेछन्दइन्द्रजुजोषस्यायौमादयसेसचा ॥ १ ॥

यथा । मनौ । विवस्वति । सोमम् । शक्र । अपिबः । सुतम् ।
यथा । त्रिते । छन्दः । इन्द्र । जुजोषसि । आयौ । मादयसे ।
सचा ॥ १ ॥

पृषध्रेमेध्येमातरिश्वनीन्द्रसुवानेअमन्दथाः ।
यथासोमंदशशिप्रेदशोण्येस्यूमरश्मावृजूनसि ॥ २ ॥

पृषध्रे । मेध्ये । मातरिश्वनि । इन्द्र । सुवाने । अमन्दथाः । यथा ।
सोमम् । दशऽशिप्रे । दशऽओण्ये । स्यूमऽरश्मौ । ऋजूनसि ॥ २ ॥

यउक्थाकेवलादधेयःसोमंधृषितापिबत् ।
यस्मैविष्णुस्त्रीणिपदाविचक्रमउपमित्रस्यधर्मभिः ॥ ३ ॥

यः । उक्था । केवला । दधे । यः । सोमम् । धृषिता । अपिबत् ।
यस्मै । विष्णुः । त्रीणि । पदा । विऽचक्रमे । उप । मित्रस्य ।
धर्मऽभिः ॥ ३ ॥

यस्यत्वमिन्द्रस्तोमेषुचाकनोवाजेवाजिञ्छतक्रतो ।
तंत्वावयंसुदुघामिवगोदुहोजुहूमसिश्रवस्यवः ॥ ४ ॥

यस्य । त्वम् । इन्द्र । स्तोमेषु । चाकनः । वाजे । वाजिन् ।
शतक्रतो इति शतऽक्रतो । तम् । त्वा । वयम् । सुदुघाम्ऽइव ।
गोऽदुहः । जुहूमसि । श्रवस्यवः ॥ ४ ॥

योनोदातासनःपितामहाँउग्रईशानकृत् ।
अयामन्नुग्रोमघवापुरूवसुर्गोरश्वस्यप्रदातुनः ॥ ५ ॥ ७ ॥

यः । नः । दाता । सः । नः । पिता । महान् । उग्रः । ईशानऽकृत् ।
अयामन् । उग्रः । मघऽवा । पुरुऽवसुः । गोः । अश्वस्य । प्र ।
दातु । नः ॥ ५ ॥ ७ ॥

यस्मैत्वंवसोदानायमंहसेसरायस्पोषमिन्वति ।
वसूयवोवसुपतिंशतक्रतुंस्तोमैरिन्द्रंहवामहे ॥ ६ ॥

यस्मै । त्वम् । वसो इति । दानाय । मंहसे । सः । रायः । पोषम् ।
इन्वति । वसुऽयवः । वसुऽपतिम् । शतऽक्रतुम् । स्तोमैः । इन्द्रम् ।
हवामहे ॥ ६ ॥

कदाचनप्रयुच्छस्युभेनिपासिजन्मनी ।
तुरीयादित्यहवनंतइन्द्रियमातस्थावमृतंदिवि ॥ ७ ॥

कदा । चन । प्र । युच्छसि ! उभे इति । नि । पासि । जन्मनी इति ।
तुरीय । आदित्य । हवनम् । ते । इन्द्रियम् । आ । तस्थौ ।
अमृतम् । दिवि ॥ ७ ॥

यस्मैत्वंमघवन्निन्द्रगिर्वणःशिक्षोशिक्षसिदाशुषे ।
अस्माकंगिरउतसुष्टुतिंवसोकण्ववच्छृणुधीहवम् ॥ ८ ॥

यस्मै । त्वम् । मघऽवन् । इन्द्र । गिर्वणः । शिक्षो इति । शिक्षसि ।
दाशुषे । अस्माकम् । गिरः । उत । सुऽस्तुतिम् । वसो इति ।
कण्वऽवत् । शृणुधि । हवम् ॥ ८ ॥

अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
पूर्वीर्ऋतस्य बृहतीरनूषतस्तोतुर्मेधा असृक्षत ॥ ९ ॥

अस्तावि । मन्म । पूर्व्यम् । ब्रह्म । इन्द्राय । वोचत । पूर्वीः । ऋतस्य । बृहतीः । अनूषत । स्तोतुः । मेधाः । असृक्षत ॥ ९ ॥

समिन्द्रो रायो बृहतीरधूनुत संक्षोणी समु सूर्यम् ।
सं शुक्रासः शुचयः संगवाशिरः सोमा इन्द्रमम न्दिषुः ॥ १० ॥ ८ ॥

सम् । इन्द्रः । रायः । बृहतीः । अधूनुत । सम् । क्षोणी इति । सम् । ऊँम् इति । सूर्यम् । सम् । शुक्रासः । शुचयः । सम् । गोऽआशिरः । सोमाः । इन्द्रम् । अमन्दिषुः ॥ १० ॥ ८ ॥

उपमं त्वाष्टौ मेध्यइन्द्रः प्रागाथं

उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम् ।
पूर्भित्तमं मघवन्निन्द्र गोविदं ईशानं राय ईमहे ॥ १ ॥

उपऽमम् । त्वा । मघोनाम् । ज्येष्ठम् । च । वृषभाणाम् । पूर्भित्ऽतमम् । मघऽवन् । इन्द्र । गोऽविदम् । ईशानम् । रायः । ईमहे ॥ १ ॥

य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवे दिवे ।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥ २ ॥

यः । आयुम् । कुत्सम् । अतिथिऽग्वम् । अर्दयः । ववृधानः । दिवेऽदिवे । तम् । त्वा । वयम् । हरिऽअश्वम् । शतऽक्रतुम् । वाजऽयन्तः । हवामहे ॥ २ ॥

आ नो विश्वेषां रसं मध्वः सिञ्चन्त्वद्रयः ।
ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः ॥ ३ ॥

आ । नः । विश्वेषाम् । रसम् । मध्वः । सिञ्चन्तु । अद्रयः । ये । पराऽवति । सुन्विरे । जनेषु । आ । ये । अर्वाऽवति । इन्दवः ॥ ३ ॥

विश्वा॒द्वेषांसिज॒हिचाव॒चाकृ॑धि॒विश्वे॑सन्व॒न्त्वावसु॑।
शीष्टे॑षु॒चित्तेमदि॒रासो॑अं॒शवो॒यत्रा॒सोम॑स्यतृ॒म्पासि॑ ॥४॥९॥

विश्वा॑। द्वेषां॑सि। ज॒हि। च॒। अव॑। च॒। आ। कृ॒धि॒। विश्वे॑। स॒न्व॒न्तु॒। आ। वसु॑। शीष्टे॑षु। चि॒त्। ते॒। म॒दि॒रासः॑। अं॒शवः॑। यत्र॑। सोम॑स्य। तृ॒म्पासि॑ ॥ ४ ॥ ९ ॥

इन्द्र॒नेदी॑य॒एदि॑हिमि॒तमे॑धाभिरू॒तिभिः॑ ॥
आशं॑तम॒शन्त॑माभिर॒भिष्टि॑भिरा॒स्वापे॑स्वा॒पिभिः॑ ॥ ५ ॥

इन्द्र॑। नेदी॑यः। आ। इत्। इ॒हि॒। मि॒तऽमे॑धाभिः। ऊ॒तिऽभिः॑। आ। श॒म्ऽत॒म॒। शम्ऽत॑माभिः। अ॒भिष्टि॑ऽभिः। आ। सु॒ऽआ॒पे॒। स्वा॒पिऽभिः॑ ॥ ५ ॥

आजि॒तुरं॒सत्प॑तिं॒विश्वच॑र्षणिं॒कृधिप्र॒जास्वाभ॑गम्।
प्रसू॑तिरा॒शचीं॑भि॒र्येत॑उ॒क्थिन॒ःक्रतुं॑पुन॒तआ॑नु॒षक् ॥ ६ ॥

आ॒जि॒ऽतुर॑म्। सत्ऽप॑तिम्। वि॒श्वऽच॑र्षणिम्। कृ॒धि। प्र॒ऽजासु॑। आऽभ॑गम्। प्र। सु। ति॒र॒। शची॑भिः। ये। ते॒। उ॒क्थिनः॑। क्रतु॑म्। पु॒न॒ते। आ॒नु॒षक् ॥ ६ ॥

यस्ते॒साधि॒ष्ठोव॑से॒तेस्या॑म॒भरे॑षुते।
व॒यंहोत्रा॑भिरु॒तदे॒वहू॑तिभिःससवां॑सो॒मनामहे ॥ ७ ॥

यः। ते॒। साधि॑ष्ठः। अव॑से। ते। स्या॒म॒। भरे॑षु। ते॒। व॒यम्। होत्रा॑भिः। उ॒त। दे॒वहू॑तिऽभिः। स॒स॒ऽवां॑सः। म॒ना॒म॒हे॒ ॥ ७ ॥

अ॒हंहितेहरिवो॒ब्रह्म॑वाज॒युरा॒जिंयामि॒सदो॒तिभिः॑।
त्वामिदे॒वतममे॒सम॑श्व॒युर्ग॒व्युरग्रे॑मथी॒नाम् ॥ ८ ॥ १० ॥

अ॒हम्। हि। ते॒। ह॒रि॒ऽवः॒। ब्रह्म॑। वा॒ज॒ऽयुः। आ॒जिम्। यामि॑। सदा॑। ऊ॒तिऽभिः॑। त्वाम्। इत्। ए॒व। तम्। अमे॑। सम्। अ॒श्व॒ऽयुः। ग॒व्युः। अग्रे॑। म॒थी॒नाम् ॥ ८ ॥ १० ॥

एतत्तेष्टौ मेध्यइन्द्रः प्रागाथं आनोविश्वइतिद्वे वैश्वदेव्यौ

एतत्तइन्द्रवीर्यंगीर्भिर्गृणन्तिकारवः ।
तेस्तोभन्तऊर्जमावन्घृतश्चुतंपौरासोनक्षन्धीतिभिः ॥ १ ॥

एतत् । ते । इन्द्र । वीर्यम् । गीःऽभिः । गृणन्ति । कारवः । ते । स्तोभन्तः । ऊर्जम् । आवन् । घृतश्चुतम् । पौरासः । नक्षन् । धीतिऽभिः ॥ १ ॥

नक्षन्तइन्द्रमवसेसुकृत्ययायेषांसुतेषुमन्दसे ।
यथासंवर्तेअमदोयथाकृशएवास्मेइन्द्रमत्स्व ॥ २ ॥

नक्षन्ते । इन्द्रम् । अवसे । सुऽकृत्यया । येषाम् । सुतेषु । मन्दसे । यथा । सम्ऽवर्ते । अमदः । यथा । कृशे । एव । अस्मे इति । इन्द्र । मत्स्व ॥ २ ॥

आनोविश्वेसजोषसोदेवासोगन्तनोपनः ।
वसवोरुद्राअवसेनआगमञ्छृण्वन्तुमरुतोहवम् ॥ ३ ॥

आ । नः । विश्वे । सऽजोषसः । देवासः । गन्तन । उप । नः । वसवः । रुद्राः । अवसे । नः । आ । गमन् । शृण्वन्तु । मरुतः । हवम् ॥ ३ ॥

पूषाविष्णुर्हवनंमेसरस्वत्यवन्तुसप्तसिन्धवः ।
आपोवातःपर्वतासोवनस्पतिःशृणोतुपृथिवीहवम् ॥ ४ ॥ ११ ॥

पूषा । विष्णुः । हवनम् । मे । सरस्वती । अवन्तु । सप्त । सिन्धवः । आपः । वातः । पर्वतासः । वनस्पतिः । शृणोतु । पृथिवी । हवम् ॥ ४ ॥ ११ ॥

यदिन्द्रराधोअस्तितेमाघोनंमघवत्तम ।
तेननोबोधिसधमाद्योवृधेभगोदानायवृत्रहन् ॥ ५ ॥

यत् । इन्द्र । राधः । अस्ति । ते । माघोनम् । मघवत्ऽतम । तेन ।
नः । बोधि । सधऽमाद्यः । वृधे । भगः । दानाय । वृत्रऽहन् ॥५॥
आजिपतेनृपतेत्वमिद्धिनोवाजआवक्षिसुक्रतो ।
वीतीहोत्राभिरुतदेववीतिभिःससवांसोविशृण्विरे ॥ ६ ॥
आजिऽपते । नृऽपते । त्वम् । इत् । हि । नः । वाजे । आ ।
वक्षि । सुक्रतो इति सुऽक्रतो । वीती । होत्राभिः । उत ।
देववीतिऽभिः । ससऽवांसः । वि । शृण्विरे ॥६ ॥

सन्तिह्यर्यआशिषइन्द्रआयुर्जनानाम् ।
अस्मान्नक्षस्वमघवन्नुपावसेधुक्षस्वपिप्युषीमिषम् ॥७॥
सन्ति । हि । अर्ये । आऽशिषः । इन्द्रे । आयुः । जनानाम् ।
अस्मान् । नक्षस्व । मघऽवन् । उप । अवसे । धुक्षस्व ।
पिप्युषीम् । इषम् ॥ ७ ॥

वयंतइन्द्रस्तोमेभिर्विधेमत्वमस्माकंशतक्रतो ।
महिस्थूरंशशयंराधोअह्रयंप्रस्कण्वायनितोशय॥८॥१२॥
वयम् । ते । इन्द्र । स्तोमेभिः । विधेम । त्वम् । अस्माकम् ।
शतक्रतो इति शतऽक्रतो । महि । स्थूरम् । शशयम् । राधः ।
अह्रयम् । प्रस्कण्वाय । नि । तोशय ॥ ८ ॥ १२ ॥

भूरीत्यंच कुशइन्द्रो गायत्री तृतीयान्त्ये अनुष्टुभौ

भूरीदिन्द्रस्यवीर्यंव्यख्यमभ्यायति । राधस्तेदस्यवेवृक॥ १ ॥
भूरि । इत् । इन्द्रस्य । वीर्यम् । वि । अख्यम् । अभि ।
आ । अयति । राधः । ते । दस्यवे । वृक ॥ १ ॥
शतंश्वेतासउक्षणोदिवितारोनरोचन्ते । महादिवंनतंस्तभुः ॥२॥

शतम् । श्वेतासः । उक्षणः । दिवि । तारः । न । रोचन्ते ।
मह्ना । दिवम् । न । तस्तभुः ॥ २ ॥

शतंवेणूञ्छतंशुनःशतंचर्माणिम्लातानि ।
शतंमेबल्बजस्तुकाअरुषीणांचतुःशतम् ॥ ३ ॥

शतम् । वेणून् । शतम् । शुनः । शतम् । चर्माणि । म्लातानि ।
शतम् । मे । बल्बजऽस्तुकाः । अरुषीणाम् । चतुःऽशतम् ॥ ३ ॥

सुदेवाःस्थकाण्वायनावयोवयोविचरन्तः ।
अश्वासोनचंक्रमत ॥ ४॥

सुऽदेवाः । स्थ । काण्वायनाः । वयःऽवयः । विऽचरन्तः ।
अश्वासः । न । चंक्रमत ॥ ४ ॥

आदित्साप्तस्यचर्किरन्नानूनस्यमहिश्रवः ।
श्यावीरतिध्वसन्पथश्चक्षुषाचनसंनशे ॥ ५ ॥ १३ ॥

आत् । इत् । साप्तस्य । चर्किरन् । न । अनूनस्य ।
महि । श्रवः । श्यावीः । अतिऽध्वसन् । पथः ।
चक्षुषा । चन । सम्ऽनशे ॥ ५ ॥ १३ ॥

प्रतितेपंच पृषध्रइन्द्रोगायत्री अन्त्याग्निसूर्यदेवताकापंक्तिः

प्रतितेदस्यवेवृकराधोअदर्श्यह्नयम् । द्यौर्नप्रथिनाशवः ॥ १ ॥

प्रति । ते । दस्यवे । वृक । राधः । अदर्शि । अह्नयम् ।
द्यौः । न । प्रथिना । शवः ॥ १ ॥

दशमह्यंपौतक्रतःसहस्रादस्यवेवृकः । नित्याद्रायोअमंहत ॥२॥

दश । मह्यम् । पौतऽक्रतः । सहस्रा । दस्यवे ।
वृकः । नित्यात् । रायः । अमंहत ॥ २ ॥

शतंमेगर्दभानांशतमूर्णावतीनाम् । शतंदासाँअतिस्रजः ॥ ३ ॥

शतम् । मे । गर्दभानाम् । शतम् । ऊर्णाऽवतीनाम् ।
शतम् । दासान् । अतिं । स्रजः ॥ ३ ॥

तत्रोअपिप्राणीयतपूतक्रतायैव्यक्ता । अश्वानामिन्नयूथ्याम् ॥ ४ ॥

तत्रो इति । अपि । प्र । अनीयत । पूतऽक्रतायै ।
विऽअक्ता । अश्वानाम् । इत् । न । यूथ्याम् ॥ ४ ॥

अचेत्यग्निश्चिकितुर्हव्यवाट्ससुमद्रथः ।
अग्निःशुक्रेणशोचिषाबृहत्सूरोअरोचतदिविसूर्योअरोचत ॥ ५ ॥१४॥

अचेति । अग्निः । चिकितुः । हव्यऽवाट् । सः । सुमत्ऽरथः ।
अग्निः । शुक्रेण । शोचिषा । बृहत् । सूरः । अरोचत ।
दिवि । सूर्यः । अरोचत ॥ ५ ॥ १४ ॥

युवंदेवाश्चतुर्मेध्य आश्विनंत्रैष्टुभं

युवंदेवाक्रतुनापूर्व्येणयुक्तारथेनतविषंयजत्रा ।
आगच्छतंनासत्याशचीभिरिदंतृतीयंसवनंपिबाथः ॥ १ ॥

युवम् । देवा । क्रतुना । पूर्व्येण । युक्ताः । रथेन । तविषम् ।
यजत्रा । आ । अगच्छतम् । नासत्या । शचीभिः ।
इदम् । तृतीयम् । सवनम् । पिबाथः ॥ १ ॥

युवांदेवास्त्रयएकादशासःसत्याःसत्यस्यदद्दशेपुरस्तात् ।
अस्माकंयज्ञंसवनंजुषाणापातंसोमंमश्विनादीद्यग्नी ॥ २ ॥

युवाम् । देवाः । त्रयः । एकादशासः । सत्याः । सत्यस्य । दद्दशे ।
पुरस्तात् । अस्माकम् । यज्ञम् । सवनम् । जुषाणा । पातम् ।
सोमम् । अश्विना । दीद्यग्नी इति दीदिऽअग्नी ॥ २ ॥

पनाय्यंतदश्विनाकृतंवांवृषभोदिवोरजसःपृथिव्याः ।
सहस्रंशंसाउतयेगविष्टौसर्वाइत्ताँउपयातापिबध्यै ॥ ३ ॥

पनाय्यम् । तत् । अश्विना । कृतम् । वाम् । वृषभः । दिवः ।
रजसः । पृथिव्याः । सहस्रम् । शंसाः । उत । ये । गोऽइष्टौ ।
सर्वान् । इत् । तान् । उप । यात । पिबध्यै ॥ ३ ॥
अयंवांभागोनिहितोयजत्रेमागिरोनासत्योपयातम् ।
पिबतंसोमंमधुमन्तमस्मेप्रदाश्वांसमवतंशचीभिः ॥ ४ ॥ १५ ॥
अयम् । वाम् । भागः । निऽहितः । यजत्रा । इमाः । गिरः ।
नासत्या । उप । यातम् । पिबतम् । सोमम् । मधुऽमन्तम् ।
अस्मे इति । प्र । दाश्वांसम् । अवतम् । शचीभिः ॥ ४ ॥ १५ ॥

यमृत्विजस्त्रिस्तोमेध्यौवैश्वदेवं त्रिष्टुप् आद्याऋत्विक्स्तुतिर्वा

यमृत्विजोबहुधाकल्पयन्तःसचेतसोयज्ञमिमंवहन्ति ।
योअनूचानोब्राह्मणोयुक्तआसीत्कास्वित्तत्रयजमानस्यसंवित् ॥ १ ॥
यम् । ऋत्विजः । बहुधा । कल्पयन्तः । सऽचेतसः । यज्ञम् ।
इमम् । वहन्ति । यः । अनूचानः । ब्राह्मणः । युक्तः । आसीत् ।
का । स्वित् । तत्र । यजमानस्य । सम्ऽवित् ॥ १ ॥
एकएवाग्निर्बहुधासमिद्धएकःसूर्योविश्वमनुप्रभूतः ।
एकैवोषाःसर्वमिदंविभात्येकंवाइदंविबभूवसर्वम् ॥ २ ॥
एकः । एव । अग्निः । बहुधा । सम्ऽइद्धः । एकः । सूर्यः । विश्वम् ।
अनु । प्रऽभूतः । एका । एव । उषाः । सर्वम् । इदम् । वि ।
भाति । एकम् । वै । इदम् । वि । बभूव । सर्वम् ॥ २ ॥
ज्योतिष्मन्तंकेतुमन्तंत्रिचक्रंसुखंरथंसुषदंभूरिवारम् ।
चित्रामघायस्ययोगेधिजज्ञेतंवांहुवेअतिरिक्तंपिबध्यै ॥ ३ ॥१६॥
ज्योतिष्मन्तम् । केतुऽमन्तम् । त्रिऽचक्रम् । सुऽखम् । रथम् ।
सुऽसदम् । भूरिऽवारम् । चित्रऽमघा । यस्य । योगे । अधिऽजज्ञे ।
तम् । वाम् । हुवे । अति । रिक्तम् । पिबध्यै ॥ ३ ॥ १६ ॥

इमानिवां सप्त सुपर्ण ऐन्द्रावरुणं जागतं

इमानिवांभागधेयानिसिस्रतइन्द्रावरुणाप्रमहेसुतेषुवाम् ।
यज्ञेयज्ञेहसवनाभुरण्यथोयत्सुन्वतेयजमानायशिक्षथः ॥ १ ॥

इमानि । वाम् । भागऽधेयानि । सिस्रते । इन्द्रावरुणा । प्र । महे ।
सुतेषु । वाम् । यज्ञेऽयज्ञे । ह । सवना । भुरण्यथः । यत् ।
सुन्वते । यजमानाय । शिक्षथः ॥ १ ॥

निष्षिध्वरीरोषधीरापआस्तामिन्द्रावरुणामहिमानमाशत ।
यासिस्रतूरजसःपारेअध्वनोययोःशत्रुर्नकिरादेवओहते ॥ २ ॥

निःऽसिध्वरीः । ओषधीः । आपः । आस्ताम् । इन्द्रावरुणा ।
महिमानम् । आशत । या । सिस्रतुः । रजसः । पारे । अध्वनः ।
ययोः । शत्रुः । नकिः । अदेवः । ओहते ॥ २ ॥

सत्यंतदिन्द्रावरुणाकृशस्यवांमध्वऊर्मिंदुहतेसप्तवाणीः ।
ताभिर्दाश्वांसमवतंशुभस्पतीयोवामदब्धोअभिपातिचित्तिभिः॥ ३

सत्यम् । तत् । इन्द्रावरुणा । कृशस्य । वाम् । मध्वः । ऊर्मिम् ।
दुहते । सप्त । वाणीः । ताभिः । दाश्वांसम् । अवतम् । शुभः ।
पती इति । यः । वाम् । अदब्धः । अभि । पाति । चित्तिऽभिः ॥ ३॥

घृतप्रुषःसौम्यांजीरदानवःसप्तस्वसारःसदनक्रतस्य ।
याहवामिन्द्रावरुणाघृतश्चुतस्ताभिर्धत्तंयजमानायशिक्षतम् ॥४॥१७॥

घृतऽप्रुषः । सौम्याः । जीरऽदानवः । सप्त । स्वसारः । सदने ।
क्रतस्य । याः । ह । वाम् । इन्द्रावरुणा । घृतऽश्चुतः । ताभिः ।
धत्तम् । यजमानाय । शिक्षतम् ॥ ४ ॥ १७ ॥

अवोचाममहतेसौभगायसत्यंत्वेषाभ्यांमहिमानमिन्द्रियम् ।
अस्मान्त्सिस्रन्द्रावरुणाघृतश्चुतस्त्रिभिःसप्तेभिरवतंशुभस्पती ॥५॥

अवोचाम । महते । सौभगाय । सत्यम् । त्वेषाभ्याम् । महिमानम् ।
इन्द्रियम् । अस्मान् । सु । इन्द्रावरुणा । घृतऽश्चुतः । त्रिऽभिः ।
साम्नेभिः । अवतम् । शुभः । पती इति ॥ ५ ॥
इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ।
यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वाना स्तपसाभ्यपश्यम् ॥ ६ ॥
इन्द्रावरुणा । यत् । ऋषिऽभ्यः । मनीषाम् । वाचः । मतिम् । श्रुतम् ।
अदत्तम् । अग्रे । यानि । स्थानानि । असृजन्त । धीराः ।
यज्ञम् । तन्वानाः । तपसा । अभि । अपश्यम् ॥ ६ ॥
इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम् ।
प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्रतिरतं न आयुः ॥७॥१८॥
इन्द्रावरुणा । सौमनसम् । अदृप्तम् । रायः । पोषम् । यजमानेषु ।
धत्तम् । प्रऽजाम् । पुष्टिम् । भूतिम् । अस्मासु । धत्तम् ।
दीर्घायुऽत्वाय । प्र । तिरतम् । नः । आयुः ॥ ७ ॥ १८ ॥

॥ इति वालखिल्यं समाप्तम् ॥

सप्तमाष्टकस्य द्वितीयाध्याये अष्टादशवर्गानंतरं विंशतिऋगात्मकमिदं परिशिष्टं

पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः । ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितं ॥ १ ॥ पावमानीर्दिशंतु न इमं लोकमथो अमुं । कामान्समर्धयन्तु नो देवैर्देवीः समाहिताः ॥ २ ॥ येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पावमान्यः पुनंतु मां ॥ ३ ॥ प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयं । तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ॥ ४ ॥ इन्द्रः पुनीहि सहमा पुनातु सोमः स्वस्त्या वरुणः समीच्या । यमो राजा प्रमृणाभिः पुनातु माजातवेदा मूर्जयन्त्या पुनातु ॥५॥ ऋषयस्तुतपस्तेपुः

सर्वेस्वर्गंजिगीषवः । तपसस्तपसोग्र्यंतुपावमानीर्ऋचोब्रवीत् ॥ ६ ॥ यन्मेगर्भेवसतःपापमुग्रंयज्जायमानस्यचकिंचिदन्यत् । जातस्यच-यच्चापिचवर्धतोमेतत्पावमानीभिरहंपुनामि ॥ ७ ॥ मातापित्रोर्यन्म-कृतंवचोमेयत्स्थावरंजंगमंमाबभूव । विश्वस्यतत्प्रदृषितंवचोमेतत्पाव मानीभिरहंपुनामि ॥ ८ ॥ गोघ्नात्तस्करत्वात्स्त्रीवधाद्यच्चकिल्बिषं । पापकंचचरणेभ्यस्तत्पावमानीभिरहंपुनामि ॥ ९ ॥ ब्रह्मवधात्सुरा-पानात्स्वर्णस्तेयाद्वृषलिगमनमैथुनसंगमात्। गुरोर्दाराधिगमनाच्चतत्पा-वमानीभिरहंपुनामि ॥१० ॥ बालघ्नान्मातृपितृवधाद्भूमितस्करात्स-र्ववर्णगमनमैथुनसंगमात् । पापेभ्यश्चप्रतिग्रहात्सद्यःप्रहरतिसर्वदुष्कृतं तत्पावमानीभिरहंपुनामि ॥ ११ ॥ क्रयविक्रयाद्योनिदोषाद्भक्षाद्भो-ज्यात्प्रतिग्रहात् । असंभोजनाच्चापिनृशंसंतत्पावमानीभिरहंपुनामि ॥ १२ ॥ दुर्यष्टुंदुरधीतंपापंयच्चाज्ञानतोकृतं । अयाजिताश्वासंया-ज्यास्तत्पावमानीभिरहंपुनामि ॥ १३ ॥ अमंत्रमन्नंयत्किंचिद्धूयते-चहुताशने । संवत्सरकृतंपापंतत्पावमानीभिरहंपुनामि ॥ १४ ॥ ऋतस्ययोनंयोमृतस्यधामविश्वादेवेभ्यःपुण्यगन्धाः । तानआपःप्र-वहन्तुपापंशुद्धागच्छामिसुकृतांमुलोकंतत्पावमानीभिरहंपुनामि॥१५ पावमानीःस्वस्त्ययनीर्याभिर्गच्छतिनांदनं । पुण्याश्चभक्षान्भक्षयत्य-मृतत्वंचगच्छति ॥ १६ ॥ पावमानींपितॄन्देवान्ध्यायेद्यश्चसरस्वतीं । पितॄंस्तस्योपवर्तेतत्क्षीरंसर्पिर्मधूदकं ॥ १७ ॥ पावमानंपरंब्रह्मशुक्रं-ज्योतिःसनातनं । ऋषींस्तस्योपतिष्ठेतत्क्षीरंसर्पिर्मधूदकं ॥ १८ ॥ पावमानंपरंब्रह्मयेपठन्तिमनीषिणः । सप्तजन्मभवेद्विप्रोधनाढ्योवे-दपारगाः ॥ १९ ॥ दशोत्तराण्यृचांश्चैवपावमानीःशतानिषट् । एत-ज्जुहुंअपेन्मंत्रैघोरमृत्युभयंहरेत् ॥ २० ॥

सप्तमाष्टकस्यपंचमाध्याये अष्टाविंशतिवर्गानन्तरं पंचर्चंपरिशिष्टं

यत्रतत्परमंपदंविष्णोर्लोकेमहीयते । देवैःसुकृतंकर्मभिस्तत्रमा ममृतंकृधीन्द्रायेन्दोपरिस्रव ॥ १ ॥ यत्रतत्परमाध्यंभूतानामधिपतिं । भावभावीचयोगींश्चतत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ॥ २ ॥ यत्र लोकास्तनूत्यजाःश्रद्धयातपसाजिताः । तेजश्चयत्रब्रह्मचतत्रमाममृ तंकृधीन्द्रायेन्दोपरिस्रव ॥ ३ ॥ यत्रदेवामहात्मानःसेन्द्राश्चमरुद्गणाः । ब्रह्माचयत्रविष्णुश्चतत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ॥ ४ ॥ यत्रगं गाचयमुनाचयत्रप्राचीसरस्वती । यत्रसोमेश्वरोदेवस्तत्रमाममृतंकृधी न्द्रायेन्दोपरिस्रव ॥ ५ ॥

अष्टमाष्टकस्य तृतीयाध्याये षड्वर्गानन्तरं इयमेकाऋक्पठ्यते

सितासितेसरितेयत्रसंगथेतत्राप्लुतासोदिवमुत्पतन्ति । येवैतन्वं विसृजन्तिधीरास्तेजनासोअमृतत्वंभजन्ते ॥ १ ॥

अष्टमाष्टकस्यतृतीयाध्याये अष्टाविंशतिवर्गानन्तरंऋक्षट्कमिदंपरिशिष्टं

अविधवाभवंवर्षाणिशतंसाग्रंतुसुव्रता । तेजस्वीचयशस्वीचध-र्मपत्नीपतिव्रता १ जनयद्बहुपुत्राणिमाचदुःखंलभेत्कचित् ॥ भर्ता-तेसोमपानित्यंभवेद्धर्मपरायणः २ अष्टपुत्राभवत्वंचसुभगाचपतिव्र-ता । भर्तुश्चैवपितुर्भ्रातुर्हृदयानन्दिनीसदा ३ इन्द्रस्यतुयथेन्द्राणीश्री-धरस्ययथाश्रिया । शंकरस्ययथागौरीतद्भर्तुरपिभर्तरि॥ ४ ॥ अत्रेर्य-थानुसूयास्याद्वसिष्ठस्याप्यरुंधती । कौशिकस्ययथासतीतथात्वंभपि-भर्तरि ॥ ५ ॥ ध्रुवैधिपोष्यामयिमह्यंत्वादाद्बृहस्पतिः । मयापत्या-प्रजावतीसंजीवशरदःशतं॥ ६ ॥

अष्टमाष्टकस्य पंचमाध्याये त्रयोविंशतिवर्गानन्तरं ऋग्द्वयमिदंपठ्यते

असौयासेनामरुतःपरेषामभ्यैतिनओजसास्पर्धमाना । तां

गूहततमसापव्रतेनयथामीषांअन्योअन्यंनजानात् ॥ १ ॥ अन्धा अमित्राभवताशीर्षाणाअहयइव । तेषांवोअग्निदग्धानामग्निमूह्वानामिन्द्रोहन्तुवरंवरं ॥ २ ॥

अष्टमाष्टकस्य षष्ठाध्याये द्वितीयवर्गान्ते इयमेका ऋक्पठ्यते

हविर्भिरेकेस्वरितःसचन्तेसुन्वन्तएकेसवनेषुसोमान् । शचीमदन्तउतदक्षिणाभिर्नेज्जिह्मायन्त्योनरकंपताम ॥ १ ॥

अष्टमाष्टकस्य सप्तमाध्याये चतुर्दशवर्गानन्तरंपंचविंशतिऋगात्मकमिदंपरिशिष्टं

आरात्रिपार्थिवंरजःपितरःप्रायुधामभिः । दिवःसदांसिबृहतीवितिष्ठसआत्वेषंवर्ततेतमः १ येतेरात्रीनृचक्षसोयुक्तासोनवतिर्नव । अशीतिःसन्त्वष्टाउतोतेसप्तसप्ततीः ॥ २ ॥ रात्रींप्रपद्येजननींसर्वभूतनिवेशनीं। भद्रांभगवतींकृष्णांविश्वस्यजगतोनिशां॥३॥ सर्वेशनींसंयमिनींग्रहनक्षत्रमालिनीं । प्रपन्नोहंशिवांरात्रींभद्रेपारमशीमहिभद्रेपारमशीमह्योनमः॥४॥ स्तोष्यामिप्रयतोदेवींशरण्यांबहुचप्रियां ॥सहस्रसंमितांदुर्गांजातवेदसेसुनवामसोमं॥५॥शांत्यर्थंतद्विजातीनांमृषिभिःसोमपाश्रिताः।ऋग्वेदेत्वंसमुत्पन्नामरातीयतोनिदहातिवेदः॥ ६ येत्वांदेविप्रपद्यन्तिब्राह्मणाहव्यवाहनीं । अविद्याबहुविद्यावासनःपर्षदतिदुर्गाणिविश्वा ॥ ७ ॥ येअग्निवर्णांशुभांसौम्यांकीर्तयिष्यन्तियेद्विजाः । तांतारयतिदुर्गाणिनावेवसिन्धुंदुरिता त्यग्निः ॥ ८ ॥ दुर्गेषुविषमेघोरेसंग्रामेरिपुसंकटे । अग्निचोरनिपातेचसर्वग्रहनिवारणेदुष्टग्रहनिवारण्योन्नमः॥९॥ दुर्गेषुविषमेषुत्वंसंग्रामेषुवनेषुच। मोहयित्वाप्रपद्यन्तेतेषांमेअभयंकुरुतेषांमेअभयंकुर्वोन्नमः॥१०॥ केशिनींसर्वभूतानांपंचमीतिचनामच॥सामांसमादिशादेवींसर्वतःपरिरक्षतुसर्वतःपरिरक्षत्वोन्नमः ॥ ११ ॥ तामग्निवर्णांतपसाज्वलन्तींवैरोचनींकर्मफ-

लेषुजुष्टां । दुर्गादेवींशरणमहंप्रपद्येसुतरसितरसेनमः सुतरसितरसेनमः ॥१२॥ दुर्गादुर्गेषुस्थानेषुशांतादेवीरभिष्टये । यइमंदुर्गास्तवंपुण्यंरात्रौरात्रौसदापठेत्॥१३॥ रात्रिःकुशिकःसौभरोरात्रिर्वाभारद्वाजीरात्रिस्तवंगायत्रं॥रात्रिसूक्तंजपेन्नित्यंतत्कालउपपद्यते ॥ १४।३ ॥ हिमस्यत्वाजरायुणाशालेपरिव्ययामसि । उतह्रदोहिनोभियोग्निर्ददातुभेषजम् ॥१५॥ शीतह्रदोहिनोभियोग्निर्ददातुभेषजं । अन्तिकामग्निमजयद्दूर्वादःशिशुलागमत् ॥ १६ ॥ अजातपुत्रपक्षायाहृदयंममदूयते । विपुलंधनंब्रह्माकाशंतवंजातवेदःकामाय ॥ १७ ॥ मांचरक्षपुत्रांश्चशरणमभूत्तवं । पिंगाक्षलोहितग्रीवकृष्णवर्णनमोस्तुते॥ १८ ॥ अस्मान्निबर्हरस्योनंसागरस्योर्मयोयथा । इन्द्रक्षत्रंददातुवरुणमभिषिंचतु ॥ १९ ॥ शत्रवोनिधनंयान्तुजयस्त्वंब्रह्मतेजसा ॥ २० ॥ कपिलजटींसर्वभक्षंचाग्निंप्रत्यक्षदैवतं । वरुणंचवशाम्यग्रेममपुत्रांश्चरक्षतुममपुत्रांश्चरक्षत्वोन्नमः ॥ २१ ॥ साग्रंवर्षशतंजीवपिबखादचमोदच । दुःखितांनद्विजांश्चैवप्रजांचपशुपालय ॥ २२॥ यावदादित्यस्तपतियावद्भ्राजतिचन्द्रमाः । यावद्वायुःप्लवायतितावज्जीवजयाजय ॥ २३ ॥ येनकेनप्रकारेणकोहिनामनजीवति । परेषामुपकारार्थंयज्जीवतिसजीवति ॥ २४ ॥ नचोरभयंनचसर्पभयंनचव्याघ्रभयंनचमृत्युभयं । यस्यापमृत्युर्नचमृत्युःससर्वलभतेससर्वंजयते । एतांवैश्वानरींसर्वदेवनमोस्तुते ॥ २५ ॥

अष्टमाष्टकस्य सप्तमाध्याये षोडशवर्गानन्तरमियमेकाऋक् आयुष्यमित्येकादश चैसूक्तंच परिशिष्टं ।

अर्वांचमिन्द्रममुतोहवामहेयोगोजिद्धनजिदश्वजिद्यः । इमंनो यज्ञंविहवेजुषस्वास्यकुल्मोहरिवोमेदिनंत्वा ॥ १ ॥
आयुष्यंवर्चस्यंरायस्पोषमौद्भिदं । इदंहिरण्यंवर्चस्वजैत्रायाविशता

दिमां ॥ १ ॥ उच्चैर्वाजिपृतनाषाट्संभासाहंधनंजयं । सर्वाःसमग्रा-
ऋद्धयोहिरण्येस्मिन्त्समाहिताः ॥ २ ॥ शुनमहंहिरण्यस्वपितुर्मानं
वजग्रभं । तेनमांसूर्यत्वचमकरंपूरुषुप्रियं ॥ ३ ॥ सम्राजंचविराजंचा
भिष्टिर्याचमेधुवा । लक्ष्मीराष्ट्रस्ययामुखेतयामामिन्द्रसंसृज ॥ ४ ॥
अग्नेःप्रजातंपरियद्धिरण्यममृतंयज्ञेअधिमर्त्येषु । यएनद्वेदसइदेनम-
र्हतिजरामृत्युर्भवतियोबिभर्ति ॥ ५ ॥ यद्वेदराजावरुणोयदुदेवीसर-
स्वती ॥ इन्द्रोयद्वृत्रहावेदतन्मेवर्चसआयुषे ॥ ६ ॥ नतद्रक्षांसिनपि
शाचाश्चरन्तिदेवानामोजःप्रथमजंह्येतत् ॥ योबिभर्तिदाक्षायणाहि
रण्यंसदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥ ७ ॥ यदाब-
ध्नंदाक्षायणाहिरण्यंशतानीकायसुमनस्यमाना ॥ तन्नआबध्नामिश्त-
शारदायायुष्मांजरदष्टिर्यथासत् ॥ ८ ॥ घृतादुल्लुसं मधुमत्सुवर्णंधनं-
जयंधरुणंधारयिष्णु।ऋणक्सपत्नादधरांश्चकृण्वदारोहमांमहतेसौभगाय
॥ ९ ॥ प्रियंमाकुरुदेवेषुप्रियंराजसुमाकुरु । प्रियंविश्वेषुगोप्तृषुमयि-
धेहिरुचारुचं ॥ १० ॥ अग्निर्येनविराजतिसूर्योयेनविराजति ॥ वि-
राज्येनविराजतितेनास्मान्ब्रह्मणस्पतेविराजसमिधंकुरु ॥ ११ ॥

अष्टमाष्टकस्याष्टमाध्याये नवमवर्गानन्तरं दशर्चमिदं मेधासूक्तसंज्ञकं परिशिष्टं

मेधामद्यमंगिरसोमेधांसप्तऋषयोददुः ॥ मेधामिन्द्रश्चाग्निश्चमेधां
धातादददातुते ॥ १ ॥ मेधांतेवरुणोराजामेधांदेवीसरस्वतीमेधांतेअ-
श्विनौदेवावाधत्तांपुष्करस्रजा ॥ २ ॥ यामेधाअप्सरासुगंधर्वेषुचय-
न्मनः ॥ दैवीयामानुषीमधासामामाविशतादिमां ॥ ३ ॥ यन्मेनोक्तं
तद्देवतांशकेयंयदनुब्रुवे ॥ निशामतंनिशामयिमयिव्रतंसहप्रियेणभू-
यासंब्रह्मणासंगमेमहि ॥ ४ ॥ शरीरंमेविचक्षणवाङ्मेमधुमद्वहां ॥
अर्द्धमहमसौसूर्योब्रह्मणानीस्थःश्रुतंमेमाप्रहासीः ॥ मेधांदेवींसम

नसारेजमानांगंधर्वजुष्टांप्रतिनोजुषस्व ॥ मह्यंमेधांवदमह्यंश्रियंवदमेधावीभूयासमजराजरिष्णु ॥ ६ ॥ सदसस्पतिमद्भुतंप्रियमिन्द्रस्यकाम्यं ॥ सनिंमेधामयासिषं ॥ ७ ॥ यांमेधांदेवगणाःपितरश्चोपासते ॥ तयामामेधयामेमेधाविनंकुरु ॥ ८ ॥ मेधाव्यंसुमनःसुप्रतीकःश्रद्धामनाःसत्यमतिःसुशेवः । महायशाधारयिष्णुप्रवक्ताभूयासमस्येस्वधयाप्रयोगे ॥ ९ ॥ नाशयित्रीपलाशस्यारुषसौपथिकामसु । अथोतनस्ययक्ष्माणांपापारोगनाशिनी ॥ १० ॥

अष्टमाष्टकस्य अष्टमाध्याये द्विचत्वारिंशद्वर्गानन्तरं नेजमषेतितृचंपरिशिष्टं

नेजमेषपरापतसुपुत्रःपुनरापत । अस्यैमेपुत्रकामायैगर्भमाधेहियःपुमान् ॥ १ ॥ यथेयंपृथिवीमह्युत्तानागर्भमादधे । एवंतंगर्भमाधेहिदशमेमासिसूतवे ॥ २ ॥ विष्णोःश्रेष्ठेनरूपेणास्यांनार्यांगवीन्यां । पुमांसंपुत्रानाधेहिदशमेमासिसूतवे ॥ ३ ॥

अष्टमाष्टअस्य अष्टमाध्याये षट्चत्वारिंशद्वर्गानन्तरमियमेकाऋक्पठ्यते ।

अनीकवन्तमूतयेग्निंगीर्भिर्हवामहे । सनःपर्षदतिद्विषः ॥ १ ॥

अष्टमाष्टकस्य अष्टमाध्यायान्ते इदंचतुर्दशर्चं संज्ञानसूक्तसंज्ञकं परिशिष्टं

संज्ञानमुशनावदत्संज्ञानंवरुणोवदत् ॥ संज्ञानमिन्द्रश्चाग्निश्चसंज्ञानंसवितावदत् ॥ १ ॥ संज्ञानंनश्वेभ्यःसंज्ञानमरणेभ्यः ॥ संज्ञानमश्विनायुवमिहास्मासुनियच्छतां ॥ २ ॥ यत्कक्षीवांसंवनंनपुत्रोअंगिरसाभवेत् ॥ तेननोद्यविश्वेदेवाःसंप्रिजांसमजीजनन् ॥ ३ ॥ संवोमनांसिजानतांसमाकूतिर्मनामसि ॥ असौयोविमनानसस्तंसमावर्तयामसि ॥ ४ ॥ नैर्हस्त्यंसेनादरणंपरिवर्त्मेतुयद्धविः । तेनामित्राणांबाहून्हविषाशोषयामसि ॥ ५ ॥ परिवर्त्मान्येषामिन्द्रःपूषाचसस्रतुः । तेषांवोअग्निदग्धानामग्निर्मृक्षानामिन्द्रोहन्तुवरंवरं ॥ ६ ॥ ऐषुनह्यवृषाजिनंहरिण

स्यधियंयथा ॥ परांअमित्रांएषत्वर्वाचींगौरुपाजंतु ॥ ७ ॥ प्राध्वरा णांपतेवसोहोतर्वरेण्यक्रतो । तुभ्यंगायत्रमृच्यते ॥ ८ ॥ गोकामोअ श्वकामःप्रजाकामउतकश्यपः । भूतंभविष्यत्प्रस्तौतिसहब्रह्मैकमक्षरं बहुब्रह्मैकमक्षरं ॥ ९ ॥ यदक्षरंभूतकृतंविश्वेदेवाउपासते । महर्षिम स्यगोसारंजमदग्निरकुर्वतं ॥ १० ॥ जमदग्निराप्यायतेछन्दोभि श्चतुरुत्तरैः । राजासोमस्यभक्षेणब्रह्मणावीर्यावतांशिवानःप्रदिशोदि शःसत्यानःप्रदिशोदिशः ॥ ११ ॥ अजोयत्तेजोदृश्रेशुक्रंज्योतिःप रोगुहा॥यदृषिःकश्यपःस्तौतिसत्यंब्रह्मचराचरंध्रुवंब्रह्मचराचरं॥१२॥ त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषमगस्त्यस्यत्र्यायुषं । यद्देवानांत्र्या युषंतन्मेअस्तुत्र्यायुषंसर्वमस्तुशतायुषंबलायुषं ॥ १३ ॥ तच्छंयोरा वृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीःस्वस्तिरस्तुनः । स्वस्तिर्मानुषे भ्यऊर्ध्वंजिगातुभेषजंशंनोअस्तुद्विपदेशंचतुष्पदे ॥ १४ ॥

इतिपरिशिष्टानिसमाप्तानि ॥

॥ अथ निविद्ध्यायः ॥

श्रीगणेशायनमः ॥ ॐम् अग्निर्देवेद्धः ॥ अग्निर्मन्विद्धः ॥ अग्निःसुष मित् ॥ होतादेवऋतः ॥ होतामनुऋतः ॥ प्रणीर्यज्ञानां ॥ रथीरध्वरा णाम् ॥ अतूर्तोहोता ॥ तूर्णिर्हव्यवाट् ॥ आदेवोदेवान्वक्षत् ॥ यक्षद ग्निर्देवोदेवान् ॥ सोअध्वराकरतिजातवेदाः ॥ १२ ॥ १ ॥ इन्द्रोमरु त्वान्सोमस्यपिबतु ॥ मरुत्स्तोत्रोमरुद्गणः ॥ मरुत्सखामरुद्वृधः ॥ घ न्नृत्रामृजदपः ॥ मरुतामोजसासह ॥ यईमेनंदेवाअन्वमदन् ॥ अमू र्यैऋत्रतूर्ये ॥ शंबरहत्येगविष्टौ ॥ अर्चंतंगुह्यापदा॥परमस्यांपरावति ॥ आदींब्रह्माणिवर्धयन् ॥ अनाधृष्टान्योजसा ॥ कृण्वंदेवेभ्योदुवः ॥ मरुद्भिःसखिभिःसह ॥ इंद्रोमरुत्वाँइहश्रवदिहसोमस्यपिबतु ॥ प्रेमां देवोदेवहूतिमवतुदेव्याधिया ॥ प्रेदंब्रह्मप्रेदंक्षत्रं ॥ प्रेमंसुन्वंतंयजमा नमवतु ॥ चित्रश्चित्राभिरूतिभिः॥ श्रवद्ब्रह्माण्यावसागमत्॥२०॥२॥ इंद्रोदेवःसोमंपिबतु ॥ एकजानांवीरतमः॥ भूरिदानंतवस्तमः॥ हर्योः स्थाता ॥ पृश्नेःप्रेता ॥ वज्रस्यभर्ता ॥ पुरांभेत्ता ॥ पुरांदर्मा ॥ अपां स्रष्टा ॥ अपान्नेता ॥ सत्वनांनेता ॥ निजघ्निर्दूरेश्रवाः ॥ उपमातिकृ द्दंसनावान् ॥ इहोशंदेवोबभूवान् ॥ इंद्रोदेवइहश्रवदिहसोमस्यपिब तु ॥ प्रेमांदेवोदेवहूतिमवतुदेव्याधिया ॥ प्रेदंब्रह्मप्रेदंक्षत्रं । प्रेमंसुन्व न्तंयजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसागम त् ॥ २० ॥ ३ ॥ सवितादेवःसोमस्यपिबतु ॥ हिरण्यपाणिःसुजिह्वः॥ सुबाहुःस्वंगुरिः ॥ त्रिरहन्त्सत्यसवनः ॥ यःप्रासुवद्वसुधीती ॥ उभेजो ष्ट्रीसवीमनि ॥ श्रेष्ठंसावित्रमासुवं ॥ दोग्ध्रींधेनुं ॥ वोढ्वारमनड्वाहं॥ आशुंसप्तिं ॥ पुरंधियोषां ॥ जिष्णुंरथेष्ठां॥सभेयंयुवानं॥ परामीवांसा

विषत्पराघशंसं ॥ सवितादेवइहश्रवदिहसोमस्यमत्सत् ॥ प्रेमांदेवोदे
वहूतिमवतुदेव्याधिया । प्रेदंब्रह्मप्रेदंक्षत्रं । प्रेमंसुन्वन्तंयजमानमवतु ।
चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसागमत् ॥ २० ॥ ४ ॥ द्या
वापृथिवीसोमस्यमत्सतां ॥ पिताचमाताच ॥ पुत्रश्चप्रजननंच ॥
धेनुश्चऋषभश्च ॥ धन्याचधिषणाच ॥ सुरेताश्चसुदुघाच ॥ शंभूश्चम
योभूश्च ॥ ऊर्जस्वतीचपयस्वतीच ॥ रेतोधाश्चरेतोभृच्च ॥ द्यावापृथि
वीइहश्रुतामिहसोमस्यमत्सतां ॥ प्रेमांदेवीदेवहूतिमवतांदेव्याधिया॥
प्रेदंब्रह्मप्रेदंक्षत्रं ॥ प्रेमंसुन्वंतंयजमानमवतां ॥ चित्रेचित्राभिरूति
भिः॥श्रुतांब्रह्माण्यावसागमंतां ॥१५॥५॥ऋभवोदेवाःसोमस्यमत्सन्
॥ विष्ट्वीस्वपसः ॥ कर्मणासुहस्ताः ॥ धन्याधनिष्ठाः॥शम्याशमिष्ठाः॥
शच्याशचिष्ठाः ॥येधेनुंविश्वजुवंविश्वरूपामरक्षन् ॥ अरक्षन्धेनुमभव
द्विश्वरूपी ॥ अयुंजतहरीअयुर्देवाँउप॥अबुध्नन्संकनीनामदंतः॥संव
त्सरेस्वपसोयज्ञियंभागमायन् ॥ ऋभवोदेवाइहश्रवन्निहसोमस्यमत्स
न् ॥ प्रेमांदेवादेवहूतिमवंतुदेव्याधिया ॥ प्रेदंब्रह्मप्रेदंक्षत्रं ॥ प्रेमंसु
न्वंतंयजमानमवंतु ॥ ॥ चित्राश्चित्राभिरूतिभिः॥ श्रवद्ब्रह्माण्यावसा
गमन् ॥१७ ॥६॥ विश्वेदेवाःसोमस्यमत्सन् ॥ विश्वेवैश्वानराः ॥ वि
श्वेहिविश्वमहसः ॥ महिमहांतः॥ तक्वान्नानेमतिथीवानः॥ अस्क्राः
पचतवाहसः ॥ वातात्मानोअग्निदूताः ॥ येद्यांचपृथिवींचातस्थुः ॥
अपश्चस्वश्च ॥ ब्रह्मचक्षत्रंच ॥ बर्हिश्चवेदिंच ॥ यज्ञंचोरुचांतरिक्षं ॥
येस्थत्रयएकादशाः॥ त्रयश्चत्रिंशच्च ॥ त्रयश्चत्रीचशता ॥ त्रयश्चत्री
चसहस्रा ॥ तावंतोभिषाचः ॥ तावंतोरातिषाचः ॥ तावतीःपत्नीः ॥
तावतीर्ग्नाः ॥ तावंतउदरणे ॥ तावंतोनिवेशने ॥ अतोवादेवाभूयांसः
स्थ ॥ मावोदेवाअपिशसामापरिशसादृक्षि॥ विश्वेदेवाइहश्रवन्निहसो
मस्यमत्सन्॥प्रेमांदेवादेवहूतिमवंतुदेव्याधिया॥ प्रेदंब्रह्मप्रेदंक्षत्रं ॥ प्रे

मंसुन्वन्तंयजमानमवंतु॥चित्राश्चित्राभिरुतिभिः॥ श्रवद्ब्रह्माण्यावसाग
मन् ॥३०॥७॥ अग्निर्वैश्वानरःसोमस्यमत्सत्॥विश्वेषांदेवानांसमित्॥
अजस्रंदैव्यंज्योतिः॥योविड्भ्योमानुषीभ्योअदीदेत्॥ द्युषुपूर्वासुदिद्यु
तानः ॥ अजरउषसामनीके॥आयोद्यांभात्यांपृथिवीम्॥ओर्वंतरिक्षं॥
ज्योतिषायज्ञायशर्मयंसत्॥ अग्निर्वैश्वानरइहश्रवदिहसोमस्यमत्सत्॥
प्रेमांदेवोदेवहूतिमवतुदेव्याधिया ॥ प्रेदंब्रह्मप्रेदंक्षत्रं ॥ प्रेमंसुन्वंतंयज
मानमवतु ॥ चित्रश्चित्राभिरूतिभिः॥श्रवद्ब्रह्माण्यावसागमत् ॥१५॥
॥ ८ ॥ मरुतोदेवाःसोमस्यमत्सन्॥सुष्टुभःस्वर्काः ॥अर्कस्तुभोबृहद्य
सः ॥ शूराअनाधृष्टरथाः ॥ त्वेषासःपृश्निमातरः ॥ शुभ्राहिरण्यखा-
दयः ॥ तवसोभंददिष्टयः ॥ नभस्यावर्षनिर्णिजः ॥ मरुतोदेवाइहश्र-
वन्निहसोमस्यमत्सन् ॥ प्रेमांदेवादेवहूतिमवंतुदेव्याधिया ॥ प्रेदंब्र-
ह्मप्रेदंक्षत्रं ॥ प्रेमंसुन्वंतंयजमानमवंतु ॥ चित्राश्चित्राभिरूतिभिः ॥
श्रवद्ब्रह्माण्यावसागमन् ॥ १४ ॥ ९ ॥ अग्निर्जातवेदाःसोमस्यमत्सत्
॥ स्वनीकश्चित्रभानुः ॥ अप्रोषिवान्गृहपतिः ॥ तिरस्तमांसिदर्शतः ॥
घृताहवनईड्यः॥ बहुलवर्मास्तृतयज्वा ॥ प्रतीत्याशत्रून्जेतापराजि-
तः ॥ अग्नेजातवेदोभिद्युम्नमभिसहआयच्छस्व ॥ तुशोअसुशः ॥
समेद्धारंस्तोतारमंहसस्पाहि ॥ अग्निर्जातवेदाइहश्रवदिहसोमस्यम-
त्सत् ॥ प्रेमांदेवोदेवहूतिमवतुदेव्याधिया ॥ प्रेदंब्रह्मप्रेदंक्षत्रं ॥ प्रेमं-
सुन्वंतंयजमानमवतु ॥ चित्रश्चित्राभिरूतिभिः ॥ श्रवद्ब्रह्माण्यावसा-
गमत् ॥१६॥१० ॥ अस्यमदेजरितरिंद्रःसोमस्यमत्सत् ॥ अस्यमदे-
जरितरिंद्रोहिमहन् ॥ अस्यमदेजरितरिंद्रोवृत्रमहन् ॥ अस्यमदेज-
रितरिंद्रोपांवेगमैरयत् ॥ अस्यमदेजरितरिंद्रोजिन्वदजुवोपिन्वदपितः
॥ अस्यमदेजरितरिंद्रउदार्यंवर्णमतिरदवदासीद्दिशोअस्तभ्नात् ॥ अ-
स्यमदेजरितरिंद्रउद्द्यामस्तभ्नादप्रथयत्पृथिवीं ॥ अस्यमदेजरितरिंद्रो-

दिविसूर्यमैरयद्यंतरिक्षमतिस्तृ॥ अस्यमदेजरितारिंद्रःसमुद्रंप्रकुपितमरम्णात् ॥ अस्यमदेजरितारिंद्रकृष्याँइवपंफणतःपर्वतान्प्रकुपिताँअरम्णात्॥ अस्यमदेजरितारिंद्रइहश्रवदिहसोमस्यमत्सत् ॥ प्रेसांदेवोदेवहूतिमवतुदेव्याधिया ॥ प्रेदंब्रह्मप्रेदंक्षत्रं॥प्रेमंसुन्वंतंयजमानमवतु॥ चित्रश्चित्राभिरूतिभिः ॥ श्रवद्ब्रह्माण्यावसागमत् ॥ १६ ॥ ११ ॥ अग्निर्द्वादश ॥ इंद्रोमरुत्वानिंद्रोदेवःसवितादेवःपृथग्विंशतिः ॥ द्यावापृथिवीपंचदश ॥ ऋभवोदेवाःसप्तदश ॥ विश्वेदेवास्त्रिंशत् ॥ अग्निर्वैश्वानरःपंचदश ॥ मरुतोदेवाश्चतुर्दश ॥ अग्निर्जातवेदाअस्यमदेपृथक्षोळश ॥ ॥ इतिनिविदध्यायः ॥

अथकुंतापाध्यायः

ॐम् अथनाराशंस्यः ॥ इदंजनाउपश्रुतनराशंसस्तविष्यते ॥ षष्टिंसहस्रानवतिंचकौरमआरुशमेषुदद्महे ॥ उष्ट्रायस्यप्रवाह्णोवधूमंतोद्विर्दश ॥ वर्ष्मारथस्यनिजिहीळतेदिवईषमाणाउपस्पृशः ॥ एषइयायमामहेशतंनिष्कान्दशस्रजः ॥ त्रीणिशतान्यर्वतांसहस्रादशगोनां ॥ ३ ॥ ॥ इतितिस्रोनाराशंस्यः ॥

अथरैभ्यः

वच्यस्वरेभवच्यस्वदक्षेनपक्वेशकुनः ॥ नष्टेजिह्वाचर्चरीतिक्षुरोनभुरिजोरिव ॥ प्ररेभासोमनीषयाद्यथागावइवेरते ॥ अमोतपुत्रकाएषाममोतकाइवासते ॥ प्ररेभधियंभरस्वगोविदंवसुविदं ॥ देवत्रेमांवाचंश्रीणीहीषुर्नवीरमस्तारं ॥ ३ ॥ इतितिस्रोरैभ्यः ॥

अथपारिक्षित्यः

राज्ञोविश्वजनीनस्ययोदेवोमर्त्याँअति ॥ वैश्वानरस्यसुष्टुतिमा

सुनोतापरिक्षितिः ॥ परिक्लिन्नःक्षेममकरत्तमासुनुमासरं ॥ मराय-न्कुर्वन्कौरव्यःपतिर्वदतिजायया ॥ कतरत्तआहराणिदधिमंथांपरिस्रुतां ॥ जायापतिंविपृच्छतिराष्ट्रेराज्ञःपरिक्षितः ॥ अभीवर्ष्मप्रजिहातेयवःपक्वःपथोबिलं । जनःसभद्रमैधत्तराष्ट्रेराज्ञःपरिक्षितः ॥ इतिचतस्रःपारिक्षित्यः ॥

अथकारव्यः

इंद्रःकारुमवूबुधदुत्तिष्ठविचराजनं ॥ ममेदुग्रस्यचर्कृधिसर्वांइत्तेपृणादुरिः ॥ इहगावःप्रजायध्वमिहाश्वाइहपूरुषाः ॥ इहोसहस्रदक्षिणोवीरस्रातानिषीदतु ॥ नेमाइंद्रगावोरिषन्मोआसांगोपतीरिषत् ॥ मासाममित्रयुर्जनइंद्रमास्तेनईशत ॥ उपवोनरएमसिसूक्तेनवचसावयंभद्रेणवचसावयं ॥ चनोदधिध्वंनोअंगिरोनरिष्येमकदाचन ॥ ४ ॥ इतिचतस्रःकारव्यः ॥

अथदिशांकृषयः

यःसभेयोविदथ्यःसुत्वायज्वाचपूरुषः ॥ सूर्यंचाभूरिशादसंतंदेवाःप्रागंकल्पयन् ॥ योजाम्याअप्रत्तमदद्यःसखायन्निनित्सति ॥ ज्येष्ठोयदिप्रचेतास्तदाहुरधरागिति ०॥ यद्भद्रस्यपुरुषस्यपुत्रोभवतिदाधृषिः ॥ तद्विप्रोअब्रवीदुदग्गंधर्वःकाव्यंवचः ॥ यश्चपणिरभुजिष्योयश्चरेवाँअदाशुरिः ॥ धीराणांशश्वतामहंतदपागितिशुश्रुम ॥ येचदेवाअयजंताथोयेचपराददिः ॥ सूर्योदिवमिवगत्वामघवानोविरप्शते ॥ ५ ॥ इतिपंचदिशांकृषयः ॥

अथजनकल्पः

योनाक्ताक्षोअनभ्यक्तोमणिवोअहिरण्यवः ॥ अब्रह्माब्रह्मणस्पुत्रस्तोताकल्पेषुसंमितः ॥ यआक्ताक्षःस्वभ्यक्तःसुमणिःसुहिरण्य

वः ॥ सुब्रह्माब्रह्मणस्पुत्रस्तोताकल्पेषुसंमितः ॥ अप्रमाणाचयेशां-
तारेवाँअप्रददिश्चयः ॥ अयभ्राकन्याकल्याणीतोताकल्पेषुसंमितः ॥
सुप्रपाणाचयेशांतारेवान्सुप्रददिश्चयः ॥ सुयभ्राकन्याकल्याणीतो
ताकल्पेषुसंमितः ॥ वावाताचमहिष्यंनस्ताचयुधिगमः ॥ अनाशुरश्व
आयामीतोताकल्पेषुसंमितः ॥ परिवृक्ताचमहिषीविश्वस्त्याचयुधि
गमः ॥ स्वाशुरश्वआयामीतोताकल्पेषुसंमितः ॥ ॥ इतिषड्ज
नकल्पाः ॥

अथेन्द्रगाथाः

यदिंद्रोदाशराज्ञेमानुषंव्यगाहथाः ॥ विरूपःसर्वस्माआसीत्सदृगक्षा-
यवंचते ॥ त्वंविषाक्षंमघवन्नग्रंपर्याकरोरभि ॥ त्वंरौहिणव्यास्यस्त्वं
वृत्रस्याभिनच्छिरः ॥ यःपर्वतान्व्यदधाद्योअपोव्यगाहथाः ॥ योवृ-
त्रोवृत्रहन्नहंस्तस्माइंद्रनमोस्तुते ॥ प्रष्टिंधावंतंहर्योरौचैःश्रवसमब्रवं॥
स्वस्त्यश्वजैत्रायेंद्रमावहसुस्रजं ॥ यत्वाश्वेतोचैःश्रवसंहर्योर्युंजंतिद-
क्षिणं ॥ मूर्धानमश्वंदेवानांविभ्रदिंद्रंमहीयसे ॥ इतिपंचेंद्रगाथाः ॥

अथैतशप्रलापाः

एताअश्वाआप्लवंते ॥ प्रतीपंप्रातिसत्वनं ॥ तासामेकाहरिक्लिका ॥
हरिक्लिकेकिमिच्छसि ॥ साधुंपुत्रंहिरण्ययं ॥ काहकंपरास्यः ॥
यत्रामूस्तिस्रःशिंशपाः ॥ परित्रयःपृदाकवः ॥ शृंगंधमंतआसते॥
अयंमहांतिअवहि ॥ १० ॥ सइत्थकंसएवकं ॥ सघाघतेसघागमे ॥
गोमीघमोमिनीरभि ॥ पुमान्भूम्नेनिनित्सति ॥ बद्धबथोइति ॥ ब-
द्धबोअथोइति ॥ अजकोरकोविका ॥ अश्वस्यवालोगोशफः ॥ के-
शिनीश्येनीएनीवा ॥ अनामयोपजिह्विका ॥ २० ॥ कोअंवकुलि

मायुनि ॥ कोअर्जुन्याःपयः ॥ कोअसिक्न्याःपयः ॥ एतंपृच्छकुहं पृच्छ ॥ कुहाकंपक्कंपृच्छ ॥ यआयंतिश्वभिष्कुभिः ॥ अकुभ्यं तःकुभायवः ॥ आमणकोमणत्थकः ॥ देवत्तःप्रतिहूर्यः ॥ पिनष्टि पतिकाहविः ॥ ३० ॥ प्रबुद्बुदोमथायति ॥ शुंगउत्पत ॥ मात्वाबिस-खानाविदन् ॥ वशायाःपुत्रमायांतं ॥ इराचेंद्रममंदत ॥ इयंनियंनि-ति ॥ अथोइयंनिति ॥ अथोज्यायस्तरोभुवत् ॥ इयंयकाशलाक-का ॥ आमिणोतिनिभज्यते ॥ ४० ॥ तस्याअनुनिभंजनं ॥ वरु-णोयातिबभ्रुभिः ॥ शतंबभ्रोरभीशवः ॥ शतंकशाहिरण्ययीः ॥ शतंरथाहिरण्ययाः ॥ आहलकुःशवर्तकुः ॥ आयवनेनतेजनिः ॥ शफेनपीवओहति ॥ वनिष्ठुनोपनृत्यति ॥ इयंमह्यमदुरिति ॥ ५० ॥ तेवृक्षाःसहतिष्ठंति ॥ पाकवलिःशकवलिः ॥ अश्वत्थःखबुरोधवः ॥ अरदुःपरमःशये ॥ हतइवपापपूरुषः ॥ अदोहमितपीयूषकं ॥ द्वौचह स्तिनौदती ॥ अध्यर्धंचपरस्वतः ॥ आदलाबुकमेककं ॥ अलाबु-कंनिखातकं ॥ ६० ॥ कर्करिकोनिखातकः ॥ तद्वातउन्मथाइति ॥ कुलायंकरवाँइति ॥ उग्रंवलिशदाततं ॥ नबलिशनदाततं ॥ कएषां कर्करींरिखत् ॥ कएषां दुंदुभिंहनत् ॥ यदींहनत्कथंहनत् ॥ दैलीं हनत्कथंहनत् ॥ पर्याकारंपुनःपुनः ॥ ७० ॥ इतिसप्ततिपदान्यैतश प्रलापाः ॥

अथप्रवल्लिकाः

विततौकिरणौद्वौतावापिनष्टिपूरुषः ॥ नवैकुमारितत्तथायथाकु मारिमन्यसे ॥ मातुष्टेकिरणौद्वौनीवीतःपुरुषादृते ॥ नवैकुमारितत्तथा यथाकुमारिमन्यसे ॥ निगृह्यकर्तकौद्वौनिरायच्छसिमध्यमां ॥ नवैकुमा रितत्तथायथाकुमारिमन्यसे ॥ उत्तानायैशयानायैतिष्ठन्नेवावगूहसि ॥

नवैकुमारितत्तथायथाकुमारिमन्यसे ॥ श्लक्ष्णायांश्लक्ष्णिकायांश्ल क्ष्णमेवावगूहसि ॥ नवैकुमारितत्तथायथाकुमारिमन्यसे ॥ अवश्ल क्ष्णमवभ्रशदंतलौमवतिह्रदे ॥ नवैकुमारितत्तथायथाकुमारिमन्यसे ॥ इतिषट्प्रवद्धिकाः ॥

अथाजिज्ञासेन्याः

इहेत्थप्रागपागुदगधराक् ॥ अरालाउदक्संथते ॥ इहेत्थप्रागपागु दगधराक् ॥ वत्साःप्रुषंतआसते ॥ इहेत्थप्रागपागुदगधराक् ॥ सवीपु त्सीलिलीशये ॥ इहेत्थप्रागपागुदगधराक् ॥ स्छालीपाकोविलीयते ॥ इतिचतस्रआजिज्ञासेन्याः ॥

अथप्रतिराध्यः

भुगित्यभिगतः ॥ शरित्यभिष्ठितः ॥ फलित्यपक्रांतः ॥ इति तिस्रःप्रतिराध्यः ॥

अथातिवादः

वीमेदेवाअक्रंसताध्वर्योक्षिप्रंप्रचर ॥ सुशस्तिरिद्भवामस्यतिप्रा क्खिवदसोमहै ॥ इत्यतिवादः ॥

अथदेवनीथाः

आदित्याहजरितरंगिरोभ्योदक्षिणामनयन् ॥ तांहंजरितर्नप्रत्या यन् ॥ तामुहजरितःप्रत्यायन् ॥ तांहजरितर्नप्रत्यगृभ्णन् ॥ तामुहज रितःप्रत्यगृभ्णन् ॥ अहानेतसंनविचेतनानि ॥ जज्ञानेतसन्नपुरोगवा सः ॥ उतश्वेतआशुपत्वा ॥ उतोपद्याभिर्जविष्ठः ॥ उतेमाशुमानंपि पर्ति ॥ आदित्यारुद्रावसवस्त्वेळते ॥ इदंराधःप्रतिगृभ्णीह्यंगिरः ॥ इ दंराधोबृहत्पृथु ॥ देवाददत्वावरं ॥ तद्वोअस्तुसुचेतनं ॥ युष्मेअस्तु दिवेदिवे ॥ प्रत्येवगृभायत ॥ इतिसप्तदशपदानिदेवनीथाः ॥

अथभूतेच्छदः

त्वमिंद्रशर्मरिणाहव्यंपरावतेभ्यः ॥ विप्रायस्तुवतेवसूनिजुरश्रव सेमहे ॥ त्वमिंद्रकंपोतायच्छिन्नपक्षायवंचते॥श्यामाकंपक्वंपीलुचवार स्माअकृणोद्वसु ॥ अस्गंरोवावदीतित्रेधाबद्धोवरत्रया ॥ इरामुहप्रशं सत्वनिरामपबाधतां ॥ इतितिस्रोभूतेच्छदः ॥

अथाहनस्याः

यदस्या अंहुभेद्याःपृथुस्थूरमुपातसत् ॥ मुष्काविदस्याएजतेगो शफेशकुलाविव ॥ यदास्थूरेणपसाअनूमुष्काउपावधीत् ॥ विष्वंचा वस्याअर्दतेसिकतास्विवगर्द्रभः ॥ यदल्पिकास्वल्पिकाकर्कंधुकेवपच्य ते ॥ वासंत्रिकंमिवतेजनोयभ्यमानावितन्वते ॥ यद्देवासोललागमुंप्र पिष्टीपिनमापिषुः ॥ सक्थ्यादेदृश्यतेनरःसक्थ्यःसाक्षीवगोयथा ॥ म हाणग्न्युपब्रूतेअश्वस्यावेशितंपसः ॥ ईदृक्फलस्यवृक्षस्यशूर्पंशूर्पंभ्रंश महि ॥ महाणग्न्यदृसंहिसोकंददस्तमासरत् ॥ शकुकाननाशकामशा कंसक्थ्युद्यमत् ॥ महाणग्न्युलूखलमतिक्रामंत्यब्रवीत् ॥ यथैवतेवन स्पतेपिघ्नंतितथैवमे ॥ महान्वैभद्रोबिल्वोमहान्पक्वउदुंबरः ॥ महाँ अभिज्ञुबाधतेमहतःसाधुखोदनं ॥ इत्यष्टावाहनस्याः ॥ इतिकुंतापा ध्यायःसमाप्तः ॥

॥ अथपुरोरुक् ॥

वायुरग्रेगायज्ञप्रीःसाकंगन्मनसायज्ञं ॥ शिवोनियुद्भिःशिवाभिः ॥१॥ हिरण्यवर्तनीनरादेवापतीअभिष्टये ॥ वायुश्चेंद्रश्चसुमुखः॥२॥ काव्याराजानाक्रत्वादक्षस्यदुरोणे ॥ रिशादसासधस्थआ ॥३॥ दैव्या अध्वर्यूआगतंरथेनसूर्यत्वचा ॥ मध्वायज्ञंसमंजाथे ॥ ४ ॥ इंद्रउक्थे भिर्मदिष्ठोवाजानांचवाजपतिः ॥ हरिवांसुतानांसखा ॥ ५ ॥ विश्वा

न्देवान्हवामहेस्मिन्यज्ञेसुपेशसः ॥ तइमंयज्ञमागमंदेवासोदेव्याधिया ॥ ६ ॥ जुषाणाअध्वरेसदोयेयज्ञस्यतनूकृतः ॥ विश्वआसोमपीतये ॥ ७ ॥ वाचमहंदेवींवाचास्मिन्यज्ञेसुपेशसा ॥ सरस्वतींहवामहे॥८ ॥ इत्यष्टौपुरोरुक् ॥

अथप्रैषाः

होतायक्षदग्निंसमिधासुषमिधासमिद्धंनाभापृथिव्याःसंगथेवामस्य ॥ वर्ष्मन्दिवइळस्पदेवेत्वाज्यस्यहोतर्यज ॥ १ ॥ होतायक्षत्तनूनपातमदितेर्गर्भंभुवनस्यगोपां ॥ मध्वाद्यदेवोदेवेभ्योदेवयानान्पथोअनक्तुवेत्वाज्यस्यहोतर्यज ॥ २ ॥ होतायक्षन्नराशंसंनृशस्त्रंनॄंःप्रणेत्रं ॥ गोभिर्वपावान्त्स्याद्वीरैःशक्तीवान्रथैःप्रथमयावाहिरण्यैश्चंद्रीवेत्वाज्यस्यहोतर्यज ॥ ३ ॥ होतायक्षदग्निमीळईळितोदेवोदेवाँऽआवक्षद्धूतोहव्यवाळमूरः ॥ उपेमंयज्ञमुपेमांदेवोदेवहूतिमवतुवेत्वाज्यस्यहोतर्यज ॥ ४ ॥ होतायक्षद्बर्हिःसुष्टरीमोर्णम्रदाअस्मिन्यज्ञेविचप्रचप्रथतांस्वासस्थंदेवेभ्यः ॥ एमेनदद्यवसवोरुद्राआदित्याःसदंतुप्रियामिंद्रस्यास्तुवेत्वाज्यस्यहोतर्यज ॥ ५ ॥ होतायक्षद्दुरःकृष्वाःकवष्योकोषधावनीरुद्राताभिर्जिहतांविपक्षोभिःश्रयतां ॥ सुप्रायणाअस्मिन्यज्ञेविश्रयंतामृतावृधोव्यंत्वाज्यस्यहोतर्यज ॥ ६ ॥ होतायक्षदुषासानक्तावृहतीसुपेशसानॄंःपतिभ्योयोनिंकृण्वाने ॥ संस्मयमानेइंद्रेणदेवैरेदंबर्हिःसीदतांवीतामाज्यस्यहोतर्यज ॥ ७ ॥ होतायक्षद्दैव्याहोतारामंद्रापोताराकवीप्रचेतसा ॥ स्विष्टमद्यान्यःकरदिषास्वभिगूर्तमन्यऊर्जासतवसेमंयज्ञंदिविदेवेषुधत्तांवीतामाज्यस्यहोतर्यज॥८॥होतायक्षत्तिस्रोदेवीरपसामपस्तमाअच्छिद्रमद्यदेमपस्तन्वतां ॥ देवेभ्योदेवीर्देवमपोव्यंत्वाज्यस्यहोतर्यज ॥ ९ ॥ होतायक्षत्त्वष्टारमग्निष्टमपाकंरे

तोधांविश्वसंयशोधां ॥ पुरुरूपमकामकर्शनंसुपोषःपोषैःस्यात्सुवी
रोवीरैस्त्वाज्यस्यहोतर्यज ॥ १० ॥ होतायक्षद्वनस्पतिमुपावस्रक्ष-
द्धियोजोष्ठारेशमंनः ॥ स्वदानूस्वधितिर्ऋतुथाद्यदेवोदेवेभ्योहव्य-
वाड्वेत्वाज्यस्यहोतर्यज ॥११॥ अजैदग्निरसनद्वाजंनिदेवोदेवेभ्योहव्य
वाट्प्रांजोभिर्हिन्वानोधेनाभिःकल्पमानोयज्ञस्यायुःप्रतिरन्नुपप्रेष्यहो
तर्हव्यादेवेभ्यः ॥ १२ ॥ होतायक्षदग्निंस्वाहाज्यस्यस्वाहामेदसःस्वा
हास्तोकानांस्वाहास्वाहाकृतीनांस्वाहाहव्यसूक्तीनां ॥ स्वाहादेवाआ
ज्यपाजुषाणाअग्नआज्यस्यव्यंतुहोतर्यज ॥१३॥ इतिप्रयाजप्रैषः ॥
होतायक्षदग्निमाज्यस्यजुषतांहविर्होतर्यज ॥ १४ ॥ होतायक्षत्सो
ममाज्यस्यजुषतांहविर्होतर्यज ॥ १५ ॥ होतायक्षदग्नीषोमौछा
गस्यवपायामेदसोजुषेतांहविर्होतर्यज ॥ १६ ॥ होतायक्षदग्नीषोमौ
पुरोळाशस्यजुषेतांहविर्होतर्यज ॥ १७ ॥ होतायक्षदग्निंपुरोळाशस्य
जुषतांहविर्होतर्यज ॥ १८ ॥ होतायक्षदग्नीषोमौछागस्यहविषआ-
त्तामद्यमध्यतोमेदउद्भृतंपुराद्वेषोभ्यःपुरापौरुषेय्यागृभः ॥ घस्तान्नूनं
घासैअत्राणांयवसप्रथमानांसुमत्क्षराणांशतरुद्रियाणामग्निष्वात्तानां
पीवोपवसनानांपार्श्वतःश्रोणितःशितामतउत्सादतोगादंगादवत्तानांक
रतएवाग्नीषोमौजुषेतांहविर्होतर्यज ॥ १९ ॥ देवेभ्योवनस्पतेह-
वींषिहिरण्यपर्णप्रदिवस्तेअर्थं ॥ प्रदक्षिणिद्रशनयानियूयऋतस्यव-
क्षिपथिभीरजिष्ठैः ॥ होतायक्षद्वनस्पतिमभिहिपिष्टतमयारभिष्टया-
रशनयाधित॥यत्राग्नेराज्यस्यहविषःप्रियाधामानियत्रसोमस्याज्यस्य
हविषःप्रियाधामानियत्राग्नीषोमयोश्छागस्यहविषःप्रियाधामानिय-
त्रवनस्पतेःप्रियापाथांसियत्रदेवानामाज्यपानांप्रियाधामानियत्राग्ने-
र्होतुःप्रियाधामानितत्रैतंप्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयांसमिवक्र-
त्वीकरदेवंदेवोवनस्पतिर्जुषतांहविर्होतर्यज ॥ २० ॥ वनस्पतेरशनया-

निपूयपिष्टतमयावयुनानिविद्वान् ॥ वहदेवत्रादिधिषोहवींषिप्रचदा-
तारममृतेषुवोचः॥होतायक्षदग्निंस्विष्टकृतमयाळग्निरग्नेराज्यस्यहविषः
प्रियाधामान्ययाट्सोमस्याज्यस्यहविषःप्रियाधामान्ययाळग्नीषोम-
योश्छागस्यहविषःप्रियाधामान्ययाड्वनस्पतेः प्रियापाथांस्ययाड्देवा-
नामाज्यपानांप्रियाधामानियक्षदग्नेर्होतुःप्रियाधामानियक्षत्स्वंमहि-
मानमायजतामेज्याइषःकृणोतुसोअध्वराजातवेदाजुषतांहविर्होतर्य
ज ॥२१॥ इतिपाशुकप्रैषाः॥ अथानुयाजप्रैषाः ॥ देवंबर्हिःसुदेवंदेवैः
स्यात्सुवीरंवीरैर्वस्तोर्दृज्येताक्तोःप्रभ्रियेतात्यन्यात्रायाबर्हिष्मतोमदे-
मवसुवनेवसुधेयस्यवेतुयज ॥२२ ॥ देवीर्द्वारःसंघातेविड्वीर्यामंछिथि-
राध्रुवादेवहूतौवत्सईमेनास्तरुणआमिमीयात्कुमारोवावनजातौमैना-
अर्वारेणुककाटःपृणग्वसुवनेवसुधेयस्यव्यंतुयज ॥२३॥ देवीउषासा-
नक्ताद्यास्मिन्यज्ञेप्रयत्यह्वेतामपिनूनंदैवीर्विशःप्रायासिष्टांसुप्रीतेसुधि-
तेवसुवनेवसुधेयस्यवीतांयज ॥ २४ ॥ देवीजोष्ट्रीवसुधितीययोरन्या-
द्यादृषांसियुयवदान्यावक्षद्वसुवार्याणियजमानायवसुवनेवसुधेयस्य
वीतांयज॥२५॥देवीऊर्जाहुतीइषमूर्जमन्यावक्षत्सग्धिंसपीतिमन्यान
वेनपूर्वेदयमानास्यामपुराणेननवंतामूर्जमूर्जाहुतीऊर्जयमानेअधातां
वसुवनेवसुधेयस्यवीतांयज ॥ २६ ॥ देवादैव्याहोतारापोतारानेष्टा-
राहताघशंसावाभरद्वसूवसुवनेवसुधेयस्यवीतांयज ॥ २७ ॥ देवीस्ति-
स्रस्तिस्रोदेवीरिळासरस्वतीभारतीद्यांभारत्यादित्यैरस्पृक्षत्सरस्वतीमं
रुद्रैर्यज्ञमावीदिहैवेळयावसुमत्यासधमादंमदेमवसुवनेवसुधेयस्यव्यंतु
यज ॥ २८ ॥ देवोनराशंसस्त्रिशीर्षाषळक्षःशतमिदेनंशितिपृष्ठाआद-
धतिसहस्रमींप्रवहंतिमित्रावरुणेदस्युहोत्रमर्हतोबृहस्पतिस्तोत्रमश्वि-
नाध्वर्यवंवसुवनेवसुधेयस्यवेतुयज ॥ २९ ॥ देवोवनस्पतिर्वर्षप्रावा-

घृतनिर्णिक्ष्यामग्रेणास्पृक्षदांतरिक्षंमध्येनाप्राःपृथिवीमपरेणादृंहीद्व-
सुवनेवसुधेयस्यवेतुयज॥३०॥देवंबर्हिर्वारितीनांनिधेधासिप्रच्युतीना-
मप्रच्युतंनिकामधरणंपुरुस्पार्हंयशस्विदेनाबर्हिन्याबर्हीष्यभिष्याम-
वसुवनेवसुधेयस्यवेतुयज ॥३१॥ देवोअग्निःस्विष्टकृत्सुद्रविणामंद्रःक-
विःसत्यमन्मायजीहोताहोतुर्होतुरायजीयानग्नेयांदेवानयाड्याँअपिप्रे-
र्यैतेहोत्रेअमत्सततांससनुर्षीहोत्रांदेवंगमांदिविदेवेषुयज्ञमेरयेमंस्विष्ट-
कृच्चाग्नेहोताभूर्वसुवनेवसुधेयस्यनमोवाकेवीहियज ॥ ३२ ॥ अथ-
सूक्तवाकप्रैषः ॥ अग्निमद्यहोतारमवृणीतायंयजमानःपचन्पक्तीःपच-
न्पुरोळाशंगृह्णन्नग्नयआज्यंगृह्णन्सोमायाज्यंबध्नन्नग्नीषोमाभ्यांछा-
गंसूपस्थाअद्यदेवोवनस्पतिरभवदग्नयआज्येनसोमायाज्येनाग्नीषो-
माभ्यांछागेनाद्यस्तंतंमेदस्तःप्रतिपचताग्नीष्टामवीदृधेतांपुरोळाशेन-
त्वामद्यर्षआर्षेयऋषीणांनपादवृणीतायंयजमानोबहुभ्यआसंगथेभ्यः
॥एषमेदेवेषुवार्यायक्ष्यतइतितायादेवादेवदानान्यदुस्तान्यस्माआच-
शास्वाचगुरस्वेषितश्चहोतरसिभद्रवाच्यायप्रेषितोमानुषःसूक्तवाकाय
सूक्ताब्रू३हि ॥ ३३ ॥ अथसुत्यायांसवनीयप्रैषाः ॥ होताय-
क्षदग्निंछागस्यवपायामेदसोजुषतांहविर्होतर्यज ॥ ३४ ॥ हो-
तायक्षदिंद्रंहरिवाँइंद्रोधानाअत्तुपूषण्वान्करंभंसरस्वतीवान्भारतीवा-
न्परिवापइंद्रस्यापूपः ॥ मित्रावरुणयोःपयस्याप्रातःप्रातःसावस्यपु-
रोळाशाँइंद्रःप्रस्थितांजुषाणोवेतुहोतर्यज ॥३५॥ होतायक्षदग्निंपुरो-
ळाशानांजुषतांहविर्होतर्यज॥३६॥ होतायक्षद्वायुमग्रेगामग्रेयावाण-
मग्रेसोमस्यपातारंकरदेवंवायुरावसागमज्जुषतांवेतुपिबतुसोमंहोतर्य-
ज ॥ ३७ ॥ होतायक्षदिंद्रवायूअर्हंताहाणागव्याभिर्गोमंताश्रियंतां-
वीरयाशुक्रयाएनयोर्नियुतोगोअग्रावीरोपशाश्वपुरस्त्यास्तासामिहप्र-
याणमस्त्विहविमोचनंकरतएवेंद्रवायूजुषेतांवीतांपिबतांसोमंहोतर्यज

॥३८॥होतायक्षन्मित्रावरुणासुक्षत्रारिशादसानिचिन्मिषंतानिचिरानि-
चिर्यांसाक्षणश्चिद्गातुवित्तरानुल्बणेनचक्षसक्रतमृतमितिदीध्यानाकरत
एवंमित्रावरुणाजुषेतांवीतांपिबतांसोमंहोतर्यज ॥ ३९ ॥ होतायक्षद
श्विनानासत्यादीद्यग्नीरुद्रवर्तिनीन्यंतरेणचक्रेणवामीरिषऽऊर्जावहतं
सुवीराःसनुतरेणाररुषोवाधेतांमधुकशयेमंयज्ञंयुवानामिमिक्षतांकरतए
वाश्विनाजुषेतांवीतंपिबतांसोमंहोतर्यज ॥४०॥ होतायक्षदिंद्रंप्रातः
प्रातःसावस्यार्वावतोगमदापरावतओरोरंतरिक्षादास्वात्सधस्थादिमेअ-
स्मैशुक्रामधुश्चुतः प्रस्थिताइंद्रायसोमास्तांजुषतांवेतुपिबतुसोमंहोतर्य-
ज ॥ ४१ ॥ होतायक्षदिंद्रंहोत्रात्सजूर्दिव आपृथिव्याक्रतुनासोमंपिब
तुहोतर्यज ॥ ४२ ॥ होतायक्षन्मरुतःपोत्रात्सुष्टुभःस्वर्काक्रतुनासोमं
पिबतुपोतर्यज ॥ ४३ ॥ होतायक्षद्रावोनेष्ट्रात्त्वष्टासुजनिमासजूर्देवा-
नांपत्नीभिर्क्रतुनासोमंपिबतुनेष्टर्यज ॥ ४४ ॥ होतायक्षदग्निमाग्नीध्रा
दृतुनासोमंपिबत्वग्नीध्रयज ॥ ४५ ॥ होतायक्षदिंद्रोब्रह्माब्राह्मणादृतु
नासोमंपिबतुब्रह्मन्यज ॥ ४६ ॥ होतायक्षन्मित्रावरुणौप्रशास्तारौ
प्रशास्त्रादृतुनासोमंपिबतांप्रशास्तर्यज ॥ ४७ ॥ होतायक्षद्देवंद्रविणो
दांहोत्रादृतुभिःसोमंपिबतुहोतर्यज ॥ ४८ ॥ होतायक्षद्देवंद्रविणोदां
पोत्रादृतुभिःसोमंपिबतुपोतर्यज ॥ ४९ ॥ होतायक्षद्देवंद्रविणोदांनेष्ट्रा
दृतुभिःसोमंपिबतुनेष्टर्यज ॥ ५० ॥ होतायक्षद्देवंद्रविणोदामपाद्धो
त्रादपात्पोत्रादपान्नेष्ट्रात्तुरीयंपात्रममृक्तममर्त्यमिंद्रपानंदेवोद्रविणोदा-
द्राविणोदसःस्वयमायूयाःस्वयमभिगूर्याःस्वयमभिगूर्तयाहोत्रयक्रतु
भिःसोमस्यपिबत्वच्छावाकयज ॥५१॥होतायक्षदश्विनाध्वर्यूआध्वर्य
वादृतुनासोमंपिबतामध्वर्यूयजतं ॥ ५२ ॥ होतायक्षदग्निंगृहपतिंगार्ह
पत्यात्सुगृहपतिस्त्वयाग्नेयंसुन्वन्यजमानस्यात्सुगृहपतिस्त्वमनेनसुन्व-
तायजमानेनाग्निर्गृहपतिर्गार्हपत्यादृतुनासोमंपिबतुगृहपतेयज ॥ ५३॥

होतायक्षदग्निंपुरोळाशस्यजुषतांहविर्होतर्यज ॥ ५४ ॥ होतायक्षदिं
द्रंहरिवाँइंद्रोधानाअत्तुपूषण्वान्करंभंसरस्वतीवान्भारतीवान्परिवापइं-
द्रस्यापूपः ॥ माध्यंदिनस्यसवनस्यपुरोळाशाँइंद्रःप्रस्थितांजुषाणोवेतु
होतर्यज ॥ ५५ ॥ होतायक्षदग्निंपुरोळाशानांजुषतांहविर्होतर्यज
॥ ५६ ॥ होतायक्षदिंद्रंमाध्यंदिनस्यसवनस्यनिष्केवल्यस्यभागस्या
त्तारंपातारंश्रोतारंहवमागंतारमस्याधियोवितारंसुन्वतोयजमानस्यवृधं
॥ ओभाकुक्षीपृणतांवार्त्रघ्नंचमाघोनंचेमेअस्मैशुक्रामधुश्चुतःप्रस्थि
ताइंद्रायसोमास्तांजुषतांवेतुपिबतुसोमंहोतर्यज ॥ ५७ ॥ होतायक्ष
दिंद्रंमरुत्वंतमिंद्रोमरुत्वांजुषतांवेतुपिबतुसोमंहोतर्यज ॥ ५८ ॥ हो-
तायक्षदादित्यान्प्रियान्प्रियधाम्नःप्रियव्रतान्महस्वसरस्यपतीनुरोरंत-
रिक्षस्याध्यक्षान्त्स्वादित्यानवोदधदस्मैसुन्वतेयजमानायकरन्नेवमा-
दित्याजुषंतांमदंतांव्यंतुपिबंतुसोमंहोतर्यज ॥ ५९ ॥ होतायक्षदग्नि
छागस्यहविषआददद्यमध्यतोमेदउद्भृतंपुराद्वेषोभ्यःपुरापौरुषेय्यागृभः
॥ घसन्नूनंघासेअत्राणांयवसप्रथमानांसुमत्क्षराणांशतरुद्रियाणाम-
ग्निष्वात्तानांपीवोपवसनानांपार्श्वतः श्रोणितःशितामतउत्सादतोंगादं-
गादवत्तानांकरदेवाग्निर्जुषतांहविर्होतर्यज ॥ ६० ॥ (होतायक्षद्वनस्प
तिमभिहिपिष्टतमयारभिष्टयारशनयाधित ॥ यत्राग्नेराज्यस्यहविषः
प्रियाधामानियत्रसोमस्याज्यस्यहविषःप्रियाधामानियत्राग्नेश्छागस्यह
विषःप्रियाधामानियत्रवनस्पतेःप्रियापाथांसियत्रदेवानामाज्यपानांप्रि
याधामानियत्राग्नेर्होतुः प्रियाधामानितत्रैतंप्रस्तुह्येवोपस्तुत्येवोपावस्रक्ष
द्भीयांसमिवकृत्वीकरदेवंदेवोवनस्पतिर्जुषतांहविर्होतर्यज ॥ होता
यक्षदग्निंस्विष्टकृतमयाळग्निरग्नेराज्यस्यहविषः प्रियाधामान्ययाट्सोम-
स्याज्यस्यहविषःप्रियाधामान्ययाळग्नेश्छागस्यहविषः प्रियाधामान्य-
याट्वनस्पतेः प्रियापाथांस्ययाट्देवानामाज्यपानांप्रियाधामानियक्षद-

ग्नेर्होतुःप्रियाधामानियक्षत्स्वंमहिमानमायजतामेज्याऽइपकृणोतुसोऽ-
अध्वराजातवेदाजुषतांहविर्होतर्यज) ॥ होतायक्षदिंद्रंहरिवांऽइंद्रो-
धानाअत्तुपूषण्वान्करंभंसरस्वतीवान्भारतीवान्परिवापइंद्रस्यापूपः ॥
तृतीयस्यसवनस्यपुरोळाशाँइंद्रःप्रस्थितांजुषाणोवेतुहोतर्यज॥ ६१ ॥
होतायक्षदग्निंपुरोळाशानांजुषतांहविर्होतर्यज ॥ ६२ ॥ होताय-
क्षदिंद्रंतृतीयस्यसवनस्यऋभुमतोविभुमतोवाजवतोबृहस्पतिवतोवि-
श्वदेव्यावतःसमस्यमदाःप्रातस्तनाअग्मतसंमाध्यंदिनाःसमिदातनास्ते-
षांसमुक्षितानांगौरइवप्रगाह्याबृषायस्वायूयाबाहुभ्यामुपयाहिहरि-
भ्यांप्रप्रुथ्याशिप्रेनिष्पृथ्यऋजीषमिमेअस्मैतीव्राआशीर्वंतःप्रस्थिता-
इंद्रायसोमास्तांजुषतांवेतुपिबतुसोमंहोतर्यज ॥ ६३ ॥ होताय-
क्षद्देवंसवितारंपरामीवांसाविषत्पराघशंसंसुसावित्रमासाविषदस्मैसु-
न्वतेयजमानायकरदेवंदेवःसविताजुषतांमदतांवेतुपिबतुसोमंहोतर्यज
॥ ६४ ॥ अग्निमद्यहोतारमवृणीतायंसुन्वन्यजमानःपचन्पक्तीः
पचन्पुरोळाशान्गृह्णन्नग्नयऽआज्यंगृह्णन्त्सोमायाज्यंबध्नन्नग्नयेछागं
सुन्वंनिंद्रायसोमंभृंजन्हरिभ्यांधानाःसूपस्थाअद्यदेवोवनस्पतिरभव
दग्नयआज्येनसोमायाज्येनाग्नयेछागेनेंद्रायसोमेनहरिभ्यांधानाभिर-
घत्तंमेदस्तःप्रतिपचताग्रभीदवीवृधतपुरोळाशैरपादिंद्रःसोमंगवाशिरं-
यवाशिरंतीव्रांतंबहुरमध्यमुपोत्थामदाश्रौद्विमदाँआनळवीवृधतांगूषै-
स्त्वामद्यर्षआर्षेयऋषीणांनपादवृणीतायंसुन्वन्यजमानोबहुभ्यआ-
संगथेभ्यः ॥ एषमेदेवेषुवसुवार्यायक्ष्यतइतितायादेवादेवदानान्य-
दुस्तान्यस्माआचशास्वाचगुरस्वेषितश्चहोतरसिभद्रवाच्यायप्रेषितो-
मानुषःसूक्तवाकायसूक्ताब्रू३हि ॥६५॥ धानासोमानामिन्द्राद्धिचपि-
बचबध्यांतेहरीधानाउपऋजीषंजिघ्रतामारथचर्षणेसिंचस्वयत्वापृच्छा
द्विषन्पत्नीःक्वामीमदथाइत्यस्मिन्त्सुन्वतियजमानेतस्मैकिमरात्थाःसुष्टु

सुवीर्यंयज्ञस्यागुरउदृचंयद्यदृचीकमतोतोतत्तथाभूद्धोतर्यज ॥ ६६॥
होतायक्षदश्विनासोमानांतिरोअह्न्यानांत्रिर्वर्तिर्यातंत्रिरिहमादये
थामुतोतुरीयंनासत्यावाजिनायधेनुःसजूरग्नीरोहिदश्वोघृतस्रुःसजूरुषा
अरुणीभिःसजूःसूर्यएतशेनसजोषावश्विनादंसोभिःकरतएवाश्विना-
जुषेतांमदेतांवीतांपिबतांसोमंहोतर्यज ॥ ६७ ॥ होतायक्षदश्विनास-
रस्वतीमिंद्रंसुत्रामाणंसोमानांसुराम्णांजुषतांव्यंतुपिबंतुमदंतुसोमान्सु-
राम्णोहोतर्यज ॥६८ ॥ होतायक्षत्प्रजापतिंमहिम्नोजुषतांवेतुपिबतु-
सोमंहोतर्यज ॥ ६९ ॥ इतिप्रैषाध्यायःसमाप्तः ॥ ॥ ॥ ७ ॥

इतिपरिशिष्टानि समाप्तानि

श्रीगणेशायनमः

अथ शौनकोक्तऋग्विधानम्।

निष्कृतिर्नहिवेदानां मंत्राणां कलिदोषतः।
कलिदोषनिवृत्त्यर्थं गायत्रीमाश्रयेद्द्विजः ॥ १ ॥
गायत्रीमंत्रसिद्ध्यर्थं गायत्रीं त्र्ययुतं जपेत्।
सर्वेषांवेदमंत्राणां सिध्यर्थं लक्षकं जपेत् ॥ २ ॥
गायत्रीं न्यासपूर्वां च सप्तव्याहृतिसंपुटाम्।
त्र्ययुतंतु जपेत्पूर्वं गायत्रीसिद्धिदा ततः ॥ ३ ॥
त्रिमधुर्वै त्रिसाहस्रं गायत्र्या जुहुयादथ।
भूसुराणां सुराणां च भेदोनास्ति जगत्त्रये ॥ ४ ॥
प्रथमं लक्षगायत्रीं सप्तव्याहृतिसंपुटां।
ततः सर्वैर्वेदमंत्रैः सर्वसिद्धिं च विंदति ॥ ५ ॥
होमः कार्यश्च गायत्र्या होतव्यं त्र्ययुतं मधु।
वेदमंत्रास्ततः सम्यग्द्विजानां कामधेनवः ॥ ६ ॥
तर्पणं चाभिषेकं च होमं विप्रांश्च भोजयेत्।
चिंतामणिः सुरनदी कामधेनुः सुरद्रुमः ॥ ७ ॥
भवानित्याहमंत्रार्थौऋग्विधानेन शौनकः।
वक्ष्येहं सूक्तमाहात्म्यं वर्गान्मंत्रांश्च शास्त्रतः ॥ ८ ॥
शृणुध्वं भूसुराः सर्वे विश्वासेन समाहिताः।
सूक्तानां यत्फलं प्रोक्तं वर्गाणां तच्छतोत्तरं ॥ ९ ॥
वर्गाणां यत्फलं प्रोक्तं मंत्राणां तच्छतोत्तरं।
मंत्राणां यत्फलं प्रोक्तं पादानां तच्छतोत्तरं ॥ १० ॥
कृतादिषु जपेद्धीमान्युगादिषु यथाक्रमं ॥ ११ ॥

२ । ६ । १३ अध्वर्यवइदंसूक्तं त्रिसहस्रं जपेज्जले ।
इहान्यजन्मनि कृता ब्रह्महत्या प्रमुच्यते ॥ १२ ॥
३ । ४ । ५ मित्रोजनेति सूक्तंवै त्रयुतं चशिवालये ।
लिंगं स्पृष्ट्वा जपेद्धीमान्सुरापी मुच्यते ततः ॥ १३ ॥
प्रत्यर्पणं ततः कार्यं हिरण्यस्तेयपापकृत् ।
५ । ६ । १ प्रत्युसूक्तं जपेल्लक्षं बिल्वे वाश्वत्थएववा ॥ १४ ॥
७ । ८ । १२ नमोमित्रस्य सूक्तं स्यादयुतं गुरुतल्पगः ।
ज्ञानतोज्ञानतोवापि मुच्यते विष्णुमन्दिरे ॥ १५ ॥
८ । ६ । १ उभाउनूनंसूक्तंतु तत्संयोगी चपातकी ।
चतुर्लक्षं जपेद्धीमान्मुच्यते सर्वपातकैः ॥ १६ ॥
८ । ६ । २६ परंमृत्योतुसूक्तं वै संकीर्णाद्युपपातकात् ।
जपेच्चेल्लक्षसंख्याकं नदीसंगे विमुच्यते ॥ १७ ॥
अकारादिहकारान्ता जलमध्ये जपेदृचः ।
ज्ञानाज्ञानकृतं पापं महापातककं दहेत् ॥ १८ ॥
८ । १ । १२ विश्वेदेवाः शास्तनेति जपेत्सूक्तं जलेपिवा ।
मुच्यतेच त्रिवारंतु सुवर्णादिप्रतिग्रहात् ॥ १९ ॥
सप्तजन्मकृतं पापं कृत्वाचाभक्ष्यभक्षणम् ।
१ । २ । ७ तद्विष्णोरित्यपां मध्ये सकृज्जप्त्वा विशुध्यति ॥ २० ॥
१ । २ । १५ अवतेहेळइति द्वाभ्यां मुच्यते सर्वकिल्विषैः ।
कृतैश्चक्रियमाणैश्च करिष्यद्भिर्नसंशयः ॥ २१ ॥
८ । ३ । १० जपेयुरभ्रसूक्तं तु सर्वशाखाः पठन्ति वै ।
इतिहासपुराणानि षडंगानि सदर्थकम् ॥ २२ ॥
१ । १ । १ अग्निमीळे जपेत्सूक्तं पापघ्नं श्रीकरंचयत् ।
पारायणफलं तस्य वेदानां चैव सर्वशः ॥ २३ ॥

२।३।१४ अस्यवामस्यसूक्तंतु जपेच्चान्यत्र वाजले।
ब्रह्महत्यादिकं दग्ध्वा विष्णुलोकंचगच्छति॥ २४॥
१।३।२४ संपूषन्नध्वनःसूक्तं यात्राकाले जपेद्बुधः।
अभयेनागमिष्यन्ति सर्वकार्यं भवेत्ततः ॥ २५॥
८।६।२२ नवाउदेवाः सूक्तं वा अन्नकामोजपेद्बुधः।
अन्नादिलभते साधु यावदस्तं समाप्नुयात् ॥ २६॥
५।५।२२ व्युषाआवोदिविजेतिप्रातःसूक्तं जपेत्सुधीः।
हिरण्यवस्त्ररत्नानि षण्मासाल्लभते नरः ॥ २७॥
८।५।८ याओषधीर्जपेत्सूक्तं बीजारोहणसंग्रहे।
यदि स्पृष्ट्वा भूमिकुंभं धान्यं तस्याक्षयं भवेत् ॥ २८॥
२।८।११ कनिक्रदज्जपेत्सूक्तं यात्राकाले प्रशस्तकं।
५।१।१ स्तुषेनरेतिसूक्तं तुप्रवेशेवै प्रशस्तकम् ॥ २९॥
४।८।१९ संपूषन्विदुषासूक्तं नष्टद्रव्योजपेद्बुधः।
पुनरायातिवै तस्य हृतंचौरादिकैर्यदि ॥ ३०॥
१।१।३५ सदसस्पतिमेकर्चं मेधाकामोजपेद्व्रती ॥ ३१॥
१।२।७ अतोदेवेति वर्गंवै जपं कुर्यादतंद्रितः।
ब्रह्माद्यैर्वंदितःपश्चाद्विष्णोःसायुज्यमाप्नुयात् ॥ ३२॥
७।८।१ प्रमायुयुञ्जेसूक्तेन नश्यत्यनृतकिल्बिषम्।
नद्यांवायुतसंख्याकं सर्पिषाग्नौ सहस्रकम् ॥ ३३॥
८।४।१७ सहस्रशीर्षासूक्तं तु त्रिवारंच दिनेदिने।
विष्ण्वादिसर्वदेवानां सर्वार्चनफलं लभेत् ॥ ३४॥
७।५।१ पुरोजितीषः सूक्तंतु गोघ्नानां पापनाशनं।
ग्रहणेचन्द्रसौरेवा मोक्षपर्यंतमप्सुचेत् ॥ ३५॥
८।३।१० अभ्रसूक्तेन साहस्रं होमं चेल्लभते तथा।

धर्मार्थकाममोक्षादि सर्पिर्मधुसमं पयः ॥ ३६ ॥

८।८।१ त्यंचिदादीनि सूक्तानि दशग्रंथान्यथाक्रमं ।
तज्जपेन तदाप्नोति यत्फलं संहितादिकैः ।
मनोवाक्कायदोषाणां प्रायश्चित्तं विशोधनं ॥ ३७ ॥

२।५।६ पितुंन्विति जपेत्सूक्तमन्नदोषोनविद्यते ।
अन्नंस्पृष्ट्वा भुक्तिकाले वर्धतेन्नंच तत्कुले ॥ ३८ ॥

८।३।६ त्रिर्जपेत्प्रसुवःसूक्तं स्नानलोपोभवेद्यदि ।
ज्येष्ठशुद्धदशम्यांतु व्यतीपाते जले सुधीः ॥ ३९ ॥

२।२।२४ विष्णोर्नुकं जपेत्सूक्तं विष्णुभक्तिर्भविष्यति ।
ज्ञानोदयं तपः पश्चाद्विष्णुसायुज्यमाप्नुयात् ॥ ४० ॥

२।७।१ मनःशुध्यै जपेत्सूक्तं नरःसेमामविड्विवै ।
अंगारकचतुर्थ्यांतु दशवारं जलेपिवा ॥ ४१ ॥

३।४।१ जातिसंकरदोषस्तु नतासूक्तेन नश्यति ॥ ४२ ॥
गुरुपुष्ये यदा युक्ते हस्तार्के वाजले स्थितः ।

२।३।२४ एकवारं त्रिवारं वाजपेत्सूक्तं कयाशुभा
ससर्वजन्मसु प्राणिकृतापीडा विनश्यति ॥ ४३ ॥
तत्सूक्तेनैव जुहुयादयुतं मधुनातिलैः ।
वदन्ति पितरः प्रीतास्तेन साकं नसंशयः ॥ ४४ ॥

३।४।२३ कृणुष्वेति जपेत्सूक्तं श्राद्धकाले प्रशस्तकं ।
रक्षोघ्नं पितृतुष्ट्यर्थं पूर्णं भवति सर्वतः ॥ ४५ ॥

४।३।१ प्रयुंजंती जपेत्सूक्तं वाक्सिद्धिस्तु सदा भवेत् ।
सप्तम्यां रविवियुक्तायां जलमध्ये यदा तदा ॥ ४६ ॥
करवीरैस्तु गायत्र्या होमं कुर्यात्सहस्रकम् ।
व्याधिनाशोभवेच्छीघ्रं मृत्युश्चैव निवर्तते ॥ ४७ ॥

अमायामिन्दुयुक्तायां कुंभमासे यदा रविः ।
५।२।३ अग्निवस्त्रिर्जपेत्सूक्तं कायशुद्धिर्दिनेदिने ॥ ४८ ॥
७।३।१ अश्वहत्यादिदोषस्तु धर्तासूक्तेन नश्यति ।
आश्वयुज्यां नवम्यांच शक्तियुक्तेतु दैवते ॥ ४९ ॥
८।४।१ विहिसोतोजपेत्सूक्तं गुरुधिक्कारदोषकृत् ।
माघेवा फाल्गुनेवापि रेवत्यांभार्गवे शतं ॥ ५० ॥
८।४।१७ दद्यात्पुरुषसूक्तेन यःपुष्पाण्यपएवच ।
अर्चितं स्याज्जगत्सर्वं तेनवै सचराचरं ॥ ५१ ॥
४।८।३० इयमददादित्येतत्सूक्तं सारस्वतं द्विजः ।
जपेत्प्रातःशुचिर्भूत्वा वाग्मी भवति बुद्धिमान् ॥ ५२ ॥
२।८।१३ सोमस्य माजपेत्सूक्तं शतजन्मकृतानि वै ।
मनोगतानि पापानि क्षयं यान्ति सहस्रशः ॥ ५३ ॥
५।५।१ यदद्येति जपेत्सूक्तं वाग्दोषात्तु विमुच्यते ।
सप्तम्यां रविवारेतु माघमासेजले शतम् ॥ ५४ ॥
६।१।१ यइन्द्रेति जपेत्सूक्तं कायदोषात्प्रमुच्यते ।
जन्मान्तरसहस्रेषु मकरस्थे दिवाकरे ॥ ५५ ॥
सप्तकोटिमहामंत्रैर्यत्फलं लभते नरः ।
३।४।११ देवस्यसवितुर्वर्गं जपंस्तत्फलमाप्नुयात् ॥ ५६ ॥
८।१।१ प्रहोतेति जपेत्सूक्तं सर्वस्तोत्रफलं लभेत् ।
८।५।२ यामुजूर्णिर्जपेन्मंत्रं सर्वहोमफलं लभेत् ॥ ५७ ॥
ककारादिहकारान्तं त्र्ययुतं तुजपेद्दचं ।
शिवस्थानेप्सुवा तत्र ऋणमोक्षोन संशयः ॥ ५८ ॥
१।२।१३ ततः कस्येति मंत्रेण जुहुयात्रिसहस्रकं ।
प्रियंगुत्रिमधुर्युक्तमृणनाशंतु भूतिदम् ॥ ५९ ॥

५।४।८ प्रातरग्निं जपेत्सूक्तं जले लक्षं शिवालये।
कन्यार्थी लभते कन्यांलाजाहुत्या शतं हुनेत् ॥ ६० ॥
घृतक्षीरं चजुहुयात्तत्सूक्तेनायुतं मधु।
जपेल्लक्षं स्त्रियं यांवै कांक्षते तां नरोलभेत् ॥ ६१ ॥
१।१।३ वायवायाहिसूक्तेन खेचरत्वं लभेन्नरः।
देवतावश्यमाप्नोति चैकवारं दिनेदिने ॥ ६२ ॥
१।१।५ अश्विनायज्वरी सूक्तं जपेद्व्याधिविनाशने।
ज्ञानैश्वर्यप्रदं तत्र सर्वसिद्धिमवाप्नुयात् ॥ ६३ ॥
१।१।७ सुरूपाद्यष्टसूक्तानि जपेच्चेद्विष्णुसन्निधौ।
सर्वसिद्धिमवाप्नोति पंचवारं दिनेदिने ॥ ६४ ॥
१।१।२२ अग्निंदूताष्टसूक्तानि जपेच्चेच्छिवसंनिधौ।
त्रिवारं चेत्त्रिवर्षंतु कार्यसिद्धिंच विन्दति ॥ ६५ ॥
१।२।१ अयंदेवायसूक्तानि त्रयोदश जपेच्छिवे।
अरिनाशस्तंभनादि षण्मासाल्लभते चषट् ॥ ६६ ॥
१।२।२० वसिष्वससूक्तानि लक्षं विष्णोर्जपेद्यदि।
स्तंभनादिकृतोदोषोराजार्थं वै प्रणश्यति ॥ ६७ ॥
१।३।१ एतादिससूक्तानि जपेल्लक्षं शिवालये।
गणेशत्वमवाप्नोति मुच्यते सर्वकिल्बिषैः ॥ ६८ ॥
२।१।१ प्रवःपान्तं जपेत्सूक्तं माघे मासि शिवालये।
तस्यारिष्टभयं नास्ति रक्षोव्याधिखलादिभिः ॥ ६९ ॥
२।२।१ सुषुमादिससूक्तानि जपेच्चेद्विष्णुमन्दिरे।
मार्गशीर्षयुतं धीमान्परकायं प्रवेशयेत् ॥ ७० ॥
७।७।१ निवर्तध्वं जपेत्सूक्तं परकायाच्चनिर्गतः।
कार्तिक्यांत्र्ययुतं धीमान्कीर्तिमान्विष्णुमन्दिरे ॥ ७१ ॥

७।७।२ अग्निमीळेभुजांसूक्तं प्राणस्याकर्षणं जपेत्।
सर्वेषां प्राणिनामेव शतवारं दिनेदिने ॥ ७२ ॥

५।४।३० प्रणवव्याहृतीनां तुत्र्ययुतं संपुटं जपेत्।
त्रैयंबकं महामंत्रं मृत्युरेव निवर्तते ॥ ७३ ॥

३।३।१ इन्द्रत्वादित्रिसूक्तानि जपेत्पूर्णसहस्रकं।
अयुतं तत्र संपूर्णं शैवेवा वैष्णवेपिवा ॥ ७४ ॥

३।८।१२ अबोध्यग्निः समित्सूक्तं पापघ्नं राजवश्यकं।
तत्पश्चाच्छ्रीकरं लक्षं जपेन्माघे शिवालये ॥ ७५ ॥

५।६।२५ जपेत्त्रिर्देवमंत्रंतुशिरोरोगोविनश्यति।
आयुर्वृद्ध्यादिकं पश्चादयुतं विष्णुमन्दिरे ॥ ७६ ॥

४।३।१ तदस्तुमित्रमंत्रेण होमं कुर्यात्सहस्रकं।
अर्केण त्रिमधुयुक्तं शिरोरोगोविनश्यति ॥ ७७ ॥

२।८।१ मन्दस्वेति जपेत्सूक्तं परस्त्रीपापनाशनं।
भूतिदं चित्तशुद्धिं च लक्षं चेद्विष्णुसन्निधौ ॥ ७८ ॥

६।४।१ त्वावतोवै सूक्तजपः क्रोधोत्थदुरितक्षयं।
करोति शांतिदः पश्चात्त्र्ययुतं वैजलेपिवा ॥ ७९ ॥

६।२।१ वयमुत्वा जपेत्सूक्तं लोभनाशः सदा भवेत्।
उदारत्वं ततः सत्यं लक्षंचेद्विष्णुमन्दिरे ॥ ८० ॥

१।७।३३ ईळेद्यावेति सूक्तंवै जपेन्मोहस्य नाशनं।
ज्ञानैश्वर्यप्रदं पश्चादयुतं बिल्ववृक्षके ॥ ८१ ॥

७।५।२९ अग्नेबृहञ्जपेत्सूक्तं मदनाशस्तदा भवेत्।
त्र्ययुतं सर्वसिद्धिंच फाल्गुने विष्णुमन्दिरे ॥ ८२ ॥

८।४।५ रक्षोहणंजपेत्सूक्तं मत्सरोनास्ति सत्यतः।

---

१ जपेयुश्चेत्सऋत्विजाः।

लक्षंचेद्भूतिदं तत्र जले वाश्वत्थएववा ॥ ८३ ॥
प्रमादादत्र यूपस्थोविनियुक्तोमृतः पशुः ।
२ । ६--७ शुद्धोनिहोतासेमाद्वावध्यायौत्रिर्जपेत्स्पृशन् ॥ ८४ ॥
४ । ८ । १७ वयमुत्वापथःसूक्तं दशवारं दिनेदिने ।
जपेच्चेदर्थवस्त्वादि राज्यं कीर्तिर्यशोभवेत् ॥ ८५ ॥
१ । २ । ७ इदंविष्णवादि पंचर्चं जस्वांगुष्ठाद्धविः स्पृशन् ।
स्पृष्टास्पृष्टं नदोषाय पितृणामक्षयं भवेत् ॥ ८६ ॥
१ । २ । ७ इदंविष्णवादिभिर्मंत्रैः पंचभिः श्राद्धकर्मणि ।
अंगुष्ठग्रहणं कुर्यात्तेन रक्षोनबाधते ॥ ८७ ॥
६ । ७ । १ इंद्रायसामसूक्तंच श्राद्धविघ्नोयदा भवेत् ।
अज्ञादिभिर्भोजनानां श्राद्धं संपूर्णमेवहि ॥ ८८ ॥
भोजनोपक्रमात्पूर्वं प्रक्रान्तात्परतोयदि ।
श्राद्धविघ्ने पुनः कार्यं जपोहोमोनतृप्तिदः ॥ ८९ ॥
६ । २ । ३७ येदेवासक्रचंजस्वाषण्मासंचदिनेदिने ।
अष्टाविंशतिमष्टौवा ऋणमोक्षोन संशयः ॥ ९० ॥
८ । ८ । २० ब्रह्मणाग्निर्जपेत्सूक्तं त्रिवारं चदिनेदिने ।
नष्टार्थाऋणिनोलभ्याः षण्मासे वत्सरेपिवा ॥ ९१ ॥
८ । ४ । १० हविष्पांतं जपेत्सूक्तं महापातकनाशनं ।
दिनेदिने त्रिवारंतु विद्या श्री स्तत्कुलेस्थिरा ॥ ९२ ॥
८ । ८ । ४९ सहस्रवेदसदृशं संज्ञानं तुसकृज्जपेत् ।
नासाध्यं तेन लोकेषु शतवारं दिनेदिने ॥ ९३ ॥
सुरापादिमहापापैर्मुच्यते नात्र संशयः ।
(सुरापस्तल्पगःस्तेयी संयोगी ब्रह्मघातकः)
८ । ६ । २६ इतिवाइतिसूक्तंतु त्रिर्जपेच्चेन्नपातकं ॥ ९४ ॥

८।७।१३ नतमंहोजपेसूक्तंत्र्ययुतं विष्णुमंदिरे।
भ्रातृघातात्तु पापाच्च मुच्यते नात्र संशयः ॥ ९५ ॥
७।१।१५ तरत्समन्दीसूक्तेन मार्जनं वैसहस्रकम्।
पतिव्रतासंगदोषात्तद्वधाद्वा नलिप्यते ॥ ९६ ॥
२।४।१ तन्नुवोचामसूक्तंवै जपेद्बिल्वे युतं बुधः।
स्वामिद्रोही महापापी तेन पापेन मुच्यते ॥ ९७ ॥
३।८।९ क्षेत्रस्यपतिनासूक्तं त्रिर्जपेदन्वहं बुधः।
सुक्षेत्रं भोगयोग्यंच त्रिवर्षात्सर्वथा लभेत् ॥ ९८ ॥
८।८।१९ मुंचामित्वाजपेत्सूक्तं श्रद्धायुक्तं दिनेदिने।
त्रिवारंच शिवस्थाने शतायुष्यं लभेन्नरः ॥ ९९ ॥
ऊर्ध्वरेखाप्रदधंतेविष्णुरिममिन्द्राग्नीअमृतंजुषेथां।
मह्यंदधानाउपदीर्घमायुरस्मेधत्तंपुरुभुजापुरंधिः ॥१००॥
८।८।११ ईरवयन्तीर्जपेत्सूक्तं लक्षं बिल्वे शिवालये।
कुष्ठनाशोभवेच्छीघ्रं माघमासे न संशयः ॥ १०१ ॥
३।७।१४ हंसमंत्रं जपेद्धीमान् त्र्ययुतं विष्णुमन्दिरे।
अर्घ्यं दद्यात्कुष्ठरोगी सुवर्णसमतामियात् ॥ १०२ ॥
५।१।२३ अग्निनरोजपेत्सूक्तं भगिनी संगसंभवात्।
बिल्वे माघे लक्षसंख्यामेनसोमुच्यते तदा ॥ १०३ ॥
८।२।२३ सक्तुमिव जपेन्मंत्रं शतवारं दिनेदिने।
लक्ष्मीश्च वर्धते नित्यमलक्ष्मीर्नहि तत्कुले ॥ १०४ ॥
८।८।४३ महित्रीणां जपेत्सूक्तं लक्षं धात्र्यां तुफाल्गुने।
सर्वं नश्यति मूढैस्तु पापं साधुषु कल्पितं ॥ १०५ ॥
८।८।४० बृहस्पतिर्नयतुसूक्तं जपेद्व्ययुतं सुतः।

पितरोदुर्मृतायस्य मुच्यन्ते सर्वपातकैः ॥ १०६ ॥
५।४।२२ अमीवहास्त्वमसूक्तं जपेच्चेत्तच्छिवालये।
अयुतं चेत्कुष्ठरोगी स्वर्णवर्णं प्रयातिच ॥ १०७ ॥
८।८।१७ उदसौकुक्षशूलीतु जपेत्सूक्तं शिवालये।
अयुतं माघमासेतु मुच्यतेनात्र संशयः ॥ १०८ ॥
८।८।१८ तीव्रस्यापि जपेत्सूक्तमपस्मारोविनश्यति।
महापातकसंयुक्तोनिरोगी भूतले स्थितः ॥ १०९ ॥
८।८।१६ सूर्योनोदिवःसूक्तं चप्रत्यहं प्रजपेद्दश।
बदर्यग्रे त्रिवर्षंतु क्षयादिव्याधिनाशनं ॥ ११० ॥
६।६।२१ यदद्यकच्चमंत्रंवै शतवारं दिनेदिने।
जयवश्यं राजवश्यं देववश्यं चभूतिदम् ॥ १११ ॥
५।७।१० माचिदन्यज्जपेत्सूक्तं पुत्र्याः संगेन दूषितः।
अश्वत्थे फाल्गुने लक्षं मुच्यते सर्वकिल्बिषैः ॥ ११२ ॥
निमंत्रितोजपेद्दोग्ध्रीमासीनस्तु निषंगिणः।
भुक्तांते वामदेव्यंवै श्राद्धभोजी न लिप्यते ॥ ११३ ॥
६।४।११ स्वादोरभक्षिसूक्तंवै श्राद्धकाले जपेद्बुधः।
वैगुण्यं कर्तृभोक्तॄणां यदि तेषां विनश्यति ॥ ११४ ॥
६।७।१६ स्वादिष्ठयादिसूक्तानि जपेच्चेद्विष्णुसन्निधौ।
रौद्रेवा पुण्यकालेवा सर्वसिद्धिं चविन्दति ॥ ११५ ॥
७।२।१९ प्रदेवाद्यग्रेपर्यन्तमश्वत्थेवै सकृज्जपेत्।
उत्थाने शयने शस्तं पंचपातकनाशनम् ॥ ११६ ॥
६।७।१६ स्वादिष्ठयाग्रेपर्यंतं जपेच्चेद्विष्णुसन्निधौ।
चैत्रे रौद्रे प्रशस्यन्तु महदैश्वर्यसंपदः ॥ ११७ ॥
३।२।२० अस्मेप्रयन्धिमंत्रंच शतवारं दिनेदिने।

बिल्वेवा प्रजपेद्धात्र्यां बहुद्रव्यंच विन्दति ॥ ११८ ॥

२ । ६ । २९ अष्टोत्तरशतं मंत्रं गणानां त्वा जपेद्बुधः ।
दिनेदिने सर्वसिद्धिः सर्वविघ्ननिवारणम् ॥ ११९ ॥

६ । ३ । १ प्रकृतानि जपेत्सूक्तं माघमासे तुलक्षकं ।
भ्रूणबालवधानांच धात्र्यां दोषात्प्रमुच्यते ॥ १२० ॥

२ । ६ । २८ त्रिकद्रुकेषु सूक्तंतु जपेल्लक्षं शिवालये ।
कन्यामनुपनीतंवा हत्वा यदि विनश्यति ॥ १२१ ॥

४ । ४ । २ ऋतस्येति जपेत्सूक्तं त्र्ययुतं विष्णुसन्निधौ ।
अश्वत्थे माघमासेच मूत्ररोगोविनश्यति ॥ १२२ ॥

८ । ३ । १५ अग्निःसप्तिं जपेत्सूक्तं दीक्षितानां वधोयदि ।
तस्माद्दोषान्नलिप्येत त्र्ययुतं विष्णुमन्दिरे ॥ १२३ ॥

६ । ७ । २३ वायोशुक्रोजपेत्सूक्तमश्वत्थे त्र्ययुतं बुधः ।
बहुधा वातरोगोपि विनश्यति न संशयः ॥ १२४ ॥

४ । ४ । २ वरुणंवो जपेत्सूक्तमयुतं धात्रीमूलके ।
तापादिव्याधिनाशस्तु सुखी पश्चात्स्थितोभुवि ॥ १२५ ॥

१ । ३ । २६ कद्रुद्रायजपेत्सूक्तं शीतज्वरविनाशनम् ।
लिंगं स्पृष्ट्वायुतं धीमान्निरोगी शीघ्रतस्तदा ॥ १२६ ॥

१ । ८ । ५ इमारुद्रायतवसेसूक्तं जपेच्छिवालये ।
उष्णज्वरविनाशाय चायुतं नात्र संशयः ॥ १२७ ॥

५ । ४ । १३ इमारुद्रायसूक्तंतु जपेचेच्छिवमन्दिरे ।
कायशूलादिरोगघ्नमयुतं नात्र संशयः ॥ १२८ ॥

८ । ३ । १७ नतंविदाथमंत्रंतु जले लक्षं जपेद्यदि ।
कृष्णाजिनस्य दानस्य किल्विषं नहि विद्यते ॥ १२९ ॥

४ । ५ । ४ अग्नेसक्षेषसूक्तंतु जले लक्षं जपेद्यदि ।

बहुप्राणिवधं कुर्वन्नग्निदोषोपिशुद्धति ॥ १३० ॥
२ । ७ । १६ आतेपितत्रपेत्सूक्तं लक्षसंख्यं शिवालये ।
गरदोपिभवेत्पूतः सर्वपापैः प्रमुच्यते ॥ १३१ ॥
७ । ८ । १७ नतंराजानौमंत्रंच धान्यां लक्षं करोतिचेत् ।
प्रतिग्रहे कृष्णपुंसोबिल्वे वानश्यति ह्यघं ॥ १३२ ॥
८ । ३ । १८ यस्तेमन्यो जपेत्सूक्तमाश्वयुज्यां तुलक्षकम् ।
महिषीदानदोषात्तु मुच्यते नात्र संशयः ॥ १३३ ॥
३ । ७ । २७ एवापित्रे जपेन्मंत्रं मार्गशीर्षे शिवालये ।
उभयतोमुखीदानदोषाल्लक्षं प्रमुच्यते ॥ १३४ ॥
२ । ३ । ८ यूपत्रस्काजपेन्मंत्रं वैशाखे विष्णुमन्दिरे ।
नरकात्प्रकृतेर्लक्षं मुच्यते दुष्प्रतिग्रहात् ॥ १३५ ॥
८ । १ । ३ जगृभ्माते जपेत्सूक्तं लक्षसंख्यातु फाल्गुने ।
कुंजरस्यतु दानस्य पापान्मुच्येत वैद्विजः ॥ १३६ ॥
४ । ४ । २१ महेनोअघसूक्तंवै माघे लक्षं जपेज्जले ।
दुष्कृताद्वयदानस्य मुच्यते भूसुरोत्तमः ॥ १३७ ॥
४ । ६ । २५ आगावस्तुजपेत्सूक्तं ज्येष्ठेवै त्र्ययुतं जले ।
गोदानस्य तुयत्पापं तत्प्रणश्यति सत्यतः ॥ १३८ ॥
६ । ४ । ७ महिवोमहतासूक्तमयुतं निष्कृतौ जपेत् ।
वेश्यासंपर्कदोषस्तु कार्तिक्यां तुप्रणश्यति ॥ १३९ ॥
४ । ४ । १६ प्रतिप्रियतमंसूक्तं बदर्यां त्र्ययुतं जपेत् ।
वृषलीसंगदोषस्तु श्रावणेवै प्रणश्यति ॥ १४० ॥
१ । ७ । २७ यदब्रवंजपेत्सूक्तं लक्षं धान्यांतु फाल्गुने ।
विधवासंगदोषस्तु प्रणश्यति न संशयः ॥ १४१ ॥
१ । ७ । २० चन्द्रमाअप्सुसूक्तंवै स्थावराणां वधेजपेत् ।

त्र्ययुतं बिल्वमूलेतु चैत्रे दोषोविनश्यति ॥ १४२ ॥

१ । ७ । ९४ इन्द्रंमित्रंजपेत्सूक्तं योगिनां वैवधोयदि ।
लक्षं माघे नदीसंगे तदा पापात्प्रमुच्यते ॥ १४३ ॥

१ । ७ । ३ जपेत्सूक्तं यतीनां चवधे सप्रत्रथेतिच ।
लक्षं धात्र्यां ज्येष्ठमासे ततोमुच्येत किल्बिषात् ॥१४४॥

५ । ४ । १ प्रब्रह्मेति जपेन्मंत्रं शतमष्टोन्तरं यदि ।
सहस्रमंत्रसदृशं किमलभ्यं जगत्त्रये ॥ १४५ ॥

८ । ८ । २६ वातस्यनुजपेत्सूक्तं नवश्राद्धे जले शतं ।
दोषात्प्रमुच्यते सत्यं स्वीकरोति यदातदा ॥ १४६ ॥

८ । ८ । २५ तुभ्येदमिन्द्रसूक्तं वैसहस्रंतु जले जपेत् ।
एकोद्दिष्टंतु योभुंक्ते तदा पापात्प्रमुच्यते ॥ १४७ ॥

८ । ८ । २२ अपेहिवै जपेत्सूक्तं श्राद्धं भुंक्ते तुषोडश ।
तदा मुच्येत नरकात्त्रिंशद्वारं जले जपेत् ॥ १४८ ॥

८ । ८ । २७ मयोभूश्वजपेत्सूक्तंवृषोत्सर्गे तुरौद्रके ।
भुक्त्वा यदि विनश्येत त्रिंशद्वारं जले यदा ॥ १४९ ॥

८ । ८ । २८ विश्राद्धहज्जपेत्सूक्तं सपिंडीभोजने जले ।
प्रेतस्थाने त्रयोविंशमन्ये विंशं नकिल्बिषं ॥ १५० ॥

८ । ८ । २९ त्वंत्यमिटतःत्सूक्तंवै त्र्यूने भुंक्ते जले यदि ।
पंचत्रिंशद्विमुच्येत नरकात्सर्वथा नरः ॥ १५१ ॥

८ । ८ । ३० आयाहीति जपेत्सूक्तं मनस्तुष्टिं करोति तत् ।
दिनेदिने पंचवारं जलस्थोविष्णुमन्दिरे ॥ १५२ ॥

१ । ७ । ७ सहस्रसूक्तंसदृश जातवेदा जपेद्यदि ।
बिल्वे माघे लक्षसंख्यामणिमादींश्चविन्दति ॥ १५३ ॥

५ । ६ । १० ध्रुवासुत्वाजपेन्मंत्रं त्र्ययुतं शृंखला यदि ।

बंधनान्मुच्यते सत्यं नारीवापि नरोपिवा ॥ १५४ ॥

८।१।५ अहंभुवंजपेत्सूक्तं ब्रह्मविद्यां चविंदति ।
दिनेदिने पंचवारं मूलाविद्या विनश्यति ॥ १५५ ॥

१।७।११ रोहिच्छ्यावाजपेद्वर्गमेकवारं दिनेदिने ।
विष्णवालये वागोष्ठेवा गोप्रदानफलं लभेत् ॥ १५६ ॥

७।६। अयंसोध्यायं त्रयोदश्यां मनीषी प्रजपेद्यदि ।
यमराजमदृष्ट्वासौ विष्णुलोके महीयते ॥ १५७ ॥

१।७।८ सयोवृषा जपेत्सूक्तं वंध्यालक्षं शिवालये ।
आयुष्यवंतं पुत्रं चभाग्यवंतं प्रसूयते ॥ १५८ ॥

१।७।५ अपनस्तु जपेत्सूक्तमस्पृश्यास्पर्शनं यदि ।
विमुच्यते तदा पापात्पंचवारं शुचिर्भवेत् ॥ १५९ ॥

१।७।६ वैश्वानरस्य सूक्तस्य जपस्यच फलं लभेत् ।
गुरुवाक्येच विश्वासं पंचवारं दिनेदिने ॥ १६० ॥

१।७।२८ विद्यख्यंतु जपेत्सूक्तमेकवारं दिनेदिने ।
नरकघ्नं श्रीकरं चदैवभेदं नविन्दति ॥ १६१ ॥

१।७।२५ यज्ञोदेवानां जपेत्सूक्तं त्र्ययुतं विष्णुमन्दिरे ।
मृतपुत्रानपत्यावा सुपुत्रं सर्वथा लभेत् ॥ १६२ ॥

१।७।१३ आमनीषां जपेद्वर्गं बहुकन्या लभेद्यदि ।
सुपुत्रं लभते पश्चात्त्र्ययुतं विष्णुमन्दिरे ॥ १६३ ॥

८।८।३२ अभीवर्तेन सूक्तेन त्र्ययुतेन जपेनच ।
चैत्रमासे वदर्यग्रे क्षुद्रदोषोविनश्यति ॥ १६४ ॥

८।८।३३ प्रवोग्रावाजपेत्सूक्तमयुतं बिल्ववृक्षके ।
ज्येष्ठे भूतदया तस्य किंचिद्दोषोन विद्यते ॥ १६५ ॥

८।८।३४ प्रसूनवोजपेत्सूक्तं त्र्ययुतंतु शिवालये ।

मातृबुद्धिः सदास्त्रीषु नान्यबुद्धिः प्रवर्तते ॥ १६६ ॥
७ । ८ । ३ यदादीध्येजपेन्मंत्रं दशवारं दिनेदिने ।
अकाले नित्यकर्माणि कालेकाले कृतानिवै ॥ १६७ ॥
८ । ७ । १४ रात्रीसूक्तं जपेद्रात्रौ त्रिवारंतु दिनेदिने ।
भूतप्रेतादिचौरादिव्याघ्रादीनां चनाशनम् ॥ १६८ ॥
७ । ८ । ४ सभामेति जपेन्मंत्रं त्रिंशद्वारं दिनेदिने ।
कैतवेनतु यत्पापं मुच्यते नाच्छिवालये ॥१६९ ॥
७ । ५ । २५ नानानंवै जपेत्सूक्तमंतकाले प्रशस्तकं ।
दिनेदिने चैकवारं सर्वपापैः प्रमुच्यते ॥ १७० ॥
७ । ८ । ४ त्रिपंचाशोजपेन्मंत्रं त्रिंशद्वारं दिनेदिने ।
राजप्रीतिं लभेद्दुर्वी प्रजासु प्रीतिवर्धनं ॥ १७१ ॥
७ । ८ । ५ अक्षैर्मेति जपेन्मंत्रं शतवा रंदिनेदिने ।
दिव्यवस्त्रं दिव्यभोगं बहुद्रव्यं चविन्दति ॥ १७२ ॥
७ । ८ । ६ अबुध्रमुत्येसूक्तं तुमाघे लक्षं जपेच्छिवे ।
सर्वपापविनिर्मुक्तोदेवेन्द्रत्वं चगच्छति ॥ १७३ ॥
७ । ८ । ३ द्वेष्टिश्वश्रूर्जपेन्मंत्रं मार्गशीर्षे तुलक्षकं ।
स्नुषासंगमदोषेण मुच्यते विष्णुमन्दिरे ॥ १७४ ॥
७ । ८ । ३ अन्येजायां जपेन्मंत्रं लक्षसंख्यं शिवालये ।
परस्त्रीसंगदोषेण माघमासे विमुच्यते ॥ १७५ ॥
७ । ७ । १० सूक्तं द्वादशलक्षंवा इन्द्रसोममिमं जपेत् ।
अनामिक्यां संगदोषे चैत्रादौ फाल्गुनावधि ॥ १७६ ॥
५ । १ । ३ कृत्यावल्गूजपेत्सूक्तं बदर्यां पंचलक्षकं ।
कारुस्त्रीसंगदोषेण मुच्यते नात्र संशयः ॥ १७७ ॥
६ । ४ । ३९ अमायां श्राद्धभोक्तावै त्वंनः पश्चाज्जपेदृचं ।

प्रतिपद्यखिलैः पापैर्मुच्यते नात्र संशयः ॥ १७८ ॥

६ । ४ । ४० प्रोअस्माउपसूक्तंतु जपेल्लक्षं शिवालये ।
दिवाकीर्तिस्त्रियासंगदोषान्मुच्येत वैद्विजः ॥ १७९ ॥

६ । ४ । ३९ प्रभंगीशूजपेन्मंत्रं लक्षसंख्यं शिवालये ।
रजस्वलासंगदोषान्मुच्यते नात्र संशयः ॥ १८० ॥

६ । ३ । २८ अस्तभ्नाद्यांजपेत्सूक्तं त्र्ययुतं विष्णुमन्दिरे ।
रजकानां चनारीणां संगश्चेत्किल्बिषं नाहि ॥ १८१ ॥

६ । ३ । २९ इमेविप्रस्यसूक्तं तुजपेत्कोटिंजले यदि ।
बहुस्त्रीजातिसंपर्कदोषोनश्यत्यसंशयः ॥ १८२ ॥

५ । ८ । १ दूरादिहेवसूक्तंतु दशलक्षं जपेद्यदि ।
सर्वपापविनिर्मुक्तोभूतिं भुंक्ते भुवि द्विजः ॥ १८३ ॥

६ । ३ । १४ अग्निनेन्द्रेण सूक्तेन त्र्ययुतने जपेनच ।
क्षत्रियाणांच नारीणां संगदोषोनविद्यते ॥ १८४ ॥

४ । २ । २५ मार्गशीर्षे जपेल्लक्षं योजागारेति मंत्रकं ।
वैश्यस्त्रीसंगदोषस्तु धात्र्यां नश्यत्यसंशयः ॥ १८५ ॥

४ । २ । २५ अग्निर्जागारमंत्रं चजपेल्लक्षं शिवालये ।
स्त्रीमात्रसंगदोषस्तु नश्यति ब्रह्मचारिणः ॥ १८६ ॥

४ । २ । २५ सदापृणोजपेन्मंत्रं लक्षसंख्यंच फाल्गुने ।
ब्रह्मचारीच तांबूलमश्नुते यदि नश्यति ॥ १८७ ॥

४ । २ । २५ श्येनआसां जपेन्मंत्रमाश्वयुज्यां तुलक्षकं ।
वेदनिंदाकृतं पापं प्रणश्यति न संशयः ॥ १८८ ॥

४ । २ । २५ सुतंभरोजपेन्मंत्रं साधुस्त्रीणां विसर्जने ।
चैत्रे लक्षं बदर्यग्रे तस्मात्पापात्प्रमुच्यते ॥ १८९ ॥

४ । २ । २४ यादृगेव जपेन्मंत्रं बदर्यग्रे तुलक्षकं ।

राजन्यहिंसा नरकः प्रणश्यति नसंशयः ॥ १९० ॥

४ । २ । २४ वेत्यग्रुर्जनिवान्मंत्रं लक्षं चेद्विष्णुमन्दिरे ।
राजसेवायानरकं ज्येष्ठे नश्यत्यसंशयः ॥ १९१ ॥

४ । २ । २४ ज्यायांसमस्यमंत्रंतु धात्र्यां लक्षं जपेद्यदि ।
राजस्त्रीसंगनरकं मार्गशीर्षे विनश्यति ॥ १९२ ॥

४ । २ । २४ समुद्रमासांमंत्रं च बदर्यां त्र्ययुतं जपेत् ।
विनश्यति तदा सत्यं वैश्यस्त्रीसंगकिल्बिषं ॥ १९३ ॥

४ । २ । २४ सहिक्षत्रस्यमंत्रं चजपेच्चाश्वत्थमूलके ।
त्र्ययुतं माघमासेतु शूद्रसेवांहसःक्षयं ॥ १९४ ॥

२ । ६ । २७ अभिभुवेजपेन्मंत्रं त्र्ययुतं श्रावणे यदि ।
विष्णवालये विमुच्येत पापं वैश्यस्य सेवनात् ॥ १९५ ॥

२ । ७ । १० दुःस्वप्नमनाशने मंत्रं योमेराजञ्जपेद्यदि ।
अष्टोत्तरंतु साहस्रं ततः सुस्वप्नमेवहि ॥ १९५ ॥

१ । ८ । २३ अधस्वप्नस्य मंत्रं चजपेद्दुःस्वप्नमाशनं ।
अष्टोत्तरंतु साहस्रं जले वाविष्णुमन्दिरे ॥ १९६ ॥

२ । ६ । २७ मंत्रं जपेद्विश्वजिते लक्षं चैत्रे शिवालये ।
क्षेत्रापहारनरकं प्रणश्यति नसंशयः ॥ १९७ ॥

२ । ६ । २७ सत्रासाहोजपेन्मंत्रं लक्षं चेत्फाल्गुने जले ।
रत्नापहारनरकान्मुच्यते नात्र संशयः ॥ १९८ ॥

२ । ६ । २७ अनानुदोजपेन्मंत्रं लक्षं चेद्विष्णुमन्दिरे ।
रत्नवस्त्रं चकार्तिक्यां धनं धान्यं चवर्धते ॥ १९९ ॥

२ । ६ । २७ यज्ञेनगाजपेन्मंत्रं दशवारं दिनेदिने ।
जपेज्जलेवा बिल्वेवा बहुद्रव्यं चविन्दति ॥ २०० ॥

२।६।२७ इन्द्रश्रेष्ठानिमंत्रं चप्रत्यहं प्रजपेच्छतम् ।
त्रिवर्षान्तं व्रती सत्यं सहस्रं विदन्ते वसु ॥ २०१ ॥

४।७।३० स्वादुष्किलाजपेन्मंत्रं शतवारं दिनेदिने ।
वज्रिणा सह वक्ताच मेदिन्यां कीर्तिमान्भवेत् ॥ २०२॥

४।७।३० अयंस्वादुर्जपेन्मंत्रं शतवारं दिनेदिने ।
राक्षसैः सह वक्ताच तेभ्योभूतिं प्रयातिसः ॥ २०३ ॥

४।७।३० अयंमेपीतमंत्रस्य जपं कुर्याच्छतं जले ।
दिनेदिने प्रवक्ताच यक्षैः सह सदा भुवि ॥ २०४ ॥

४।७।३० अयंसयोजपेन्मंत्रं शतवारं दिनेदिने ।
गंधर्वैः सह वक्ताच सौभाग्यं विन्दते भुवि ॥ २०५ ॥

४।७।३० अयंविदज्जपेन्मंत्रं शतवारं दिनेदिने ।
किन्नरैः सह वक्ताच सौंदर्यं भुवमेतिसः ॥ २०६ ॥

४।७।३१ धृषत्पिबजपेन्मंत्रं शतवारं दिनेदिने ।
ब्रह्मणा सह वक्ताच ब्रह्मलोके महीयते ॥ २०७ ॥

४।७।३१ इन्द्रप्रणोजपेन्मंत्रं शतवारं दिनेदिने ।
विष्णुना सह वक्ता सविष्णुलोके महीयते ॥ २०८ ॥

४।७।३१ उरुंनःप्रजपेन्मंत्रं शतवारं दिनेदिने ।
शिवेन सह वक्ता चशिवलोके महीयते ॥ २०९ ॥

४।७।३१ वरिष्ठेनोजपेन्मंत्रं शतवारं दिनेदिने ।
किंपुरुषैः सह वक्ता चसुपुत्रंभूतिमेतिसः ॥ २१० ॥

४।७।३१ इन्द्रमृळजपेन्मंत्रं शतवारं दिनेदिने ।
विन्दते सधनं धान्यं वक्ता विद्याधरैः सह ॥ २११ ॥

४।७।११ मन्द्रस्यकवेर्मंत्रं चदिनं प्रति जपेच्छतं ।
अप्रियायस्य लोकेषु प्रियास्ते स्युर्जना भुवि ॥ २१२ ॥

४ । ७ । ११ अयमुशानोमंत्रं चादिनं प्रति जपेच्छतं ।
मनःशुद्धिं चवाक्शुद्धिं कायशुद्धिं चविन्दति ॥ २१३ ॥
४ । ७ । ११ नूगृणानोजपेन्मंत्रं शतवारं दिनेदिने ।
अणिमादिमहासिद्धिं लब्ध्वा लोके प्रपूज्यते ॥ २१४ ॥
४ । ७ । १२ इन्द्रपिबजपेन्मंत्रं शतवारं दिनेदिने ।
पितृभक्तिस्तु पुत्रस्य ह्यबुद्धिस्तु विनश्यति । २१५ ॥
४ । ७ । १२ अस्यपिबजपेन्मंत्रं शतवारं दिनेदिने
भ्रातृस्नेहोवर्धतेच विस्नेहोनास्ति सर्वथा । ॥ २१६ ॥
३ । ७ । १० दिनेदिनेष्टसाहस्रं जपेन्मंत्रमपादितः ।
वत्सरांते भोग्यभोगान्धनं भूमिंच विन्दति ॥ २१७ ॥
४ । ७ । १० दूराच्चिदाजपेन्मंत्रं लक्षं माघे जले यदि ।
गृहस्थधर्मलोपस्य प्रायश्चित्तं तदेवहि ॥ २१८ ॥
४ । ७ । १० तंवोधियाजपेन्मंत्रं लक्षं चैत्रे शिवालये ।
ब्रह्मचारी स्वधर्मस्य न्यूनंचेत्पूर्णमेव तत् ॥ २१९ ॥
४ । ७ । १० वर्धाद्यंच जपेन्मंत्रं कार्तिक्यां विष्णुमन्दिरे ।
वानप्रस्थाश्रमे कर्मन्यूनं संपूर्णतामियात् ॥ २२० ॥
४ । ७ । १० एवाजज्ञानमंत्रंच जपेल्लक्षंतु फाल्गुने ।
नष्टक्षेत्रं नष्टधनं पुनरायाति सर्वथा ॥ २२१ ॥
४ । ५ । १८ समिद्धमग्निं मंत्रंच दिनं प्रति जपेच्छतं ।
मानसींदेवतापूजा लभते नात्र संशयः ॥ २२२ ॥
४ । ७ । १२ आयाहिशश्वन्मंत्रंच दिनं प्रति जपेच्छतं ।
वाचिकीं देवतापूजां लभते नात्र संशयः ॥ २२३ ॥
४ । ७ । १२ यदिन्द्रदिविमंत्रंच दिनं प्रति जपेच्छतं ।
कायिकीं देवतापूजां लभते नात्र संशयः ॥ २२४ ॥

८।७।२२ प्रोष्वस्मैतु जपेत्सूक्तं लक्षद्वादशकं जले।
गुप्तपापं विनश्येत चैत्रादौ फाल्गुनावधि ॥ २२५ ॥
४।७।१३ अहेळमानोमंत्रंच दिनं प्रति जपेच्छतं।
शास्त्रेषु संशयोनास्ति विश्वासः सर्वथा भवेत् ॥ २२६ ॥
४।७।१३ यातेकाकुज्जपेन्मंत्रं शतवारं दिनेदिने।
विपरीतं नशास्त्रेषु यथार्थं दृश्यते सदा ॥ २२७ ॥
४।७।१३ एषद्रप्सोजपेन्मंत्रं शतवारं दिनेदिने।
भ्रान्तिबुद्धिर्न शास्त्रेषु यथार्थं दृश्यते सदा ॥ २२८ ॥
४।७।१३ सुतःसोमोजपेन्मंत्रं शतवारं दिनेदिने।
अन्यार्थोनच शास्त्रेषु यथार्थता चदृश्यते ॥ २२९ ॥
४।७।१३ ह्वयामसि जपेन्मंत्रं शतवारं दिनेदिने।
व्यासोक्तेच पुराणार्थे यथार्थताच दृश्यते ॥ २३० ॥
४।७।१४ प्रत्यस्मै प्रजपेन्मंत्रं शतवारं दिनेदिने।
महाकाव्येषु विश्वासमविश्वासं नसर्वथा ॥ २३१ ॥
४।७।१४ एमेनं प्रजपेन्मंत्रं शतवारं दिनेदिने।
स्मृत्यर्थेनान्यथा बुद्धिर्यथार्थं पश्यति द्विजः ॥ २३२ ॥
३।२।१२ प्रपर्वतानां सूक्तंतु जपेल्लक्षं जले यदि।
बिल्वेवा पापनाशश्च ततोभूतिमवाप्नुयात् ॥ २३३ ॥
४।७।१४ यदीसुतेभिर्मंत्रंच विंशद्वारं जपेद्यदि।
अनुमासिकेषु योभुंक्ते पातकान्मुच्यते तदा ॥ २३४ ॥
३।२।११ अहन्नहिंपरिशयानं पंचविंशज्जपद्वंचे।
न्यूनेतु मासिके भुंक्ते तस्माद्दोषान्नलिप्यते ॥ २३५ ॥
३।२।११ यज्ञोहितेजपेन्मंत्रं विंशद्वारं शिवालये।
अब्दमोक्षंतु योभुंक्ते तदा पापात्प्रमुच्यते ॥ २३६ ॥

१।२।७ तद्विप्रासोजपेन्मंत्रं शतवारं दिनेदिने।
अन्तकाले महाविष्णुं स्मरेत्किंचिन्न सर्वथा ॥ २३७ ॥
१।२।७ अतोदेवाइति मंत्रं दिनंप्रति जपेच्छतं।
वासं याति महाविष्णोर्विष्वक्सेनादिभिः सह ॥ २३८ ॥
१।२।७ इदंविष्णुर्जपेन्मंत्रं शतवारं दिनेदिने।
जयादीनांतु संयुक्तस्ततः सारूप्यमेति सः ॥ २३९ ॥
१।२।७ त्रीणिपदाजपेन्मंत्रं शतवारं दिनेदिने।
सान्निध्यमेति विष्णोश्च वैनतेयादिभिः सह ॥ २४० ॥
१।२।७ विष्णोःकर्माणिमंत्रं चदिनं प्रति जपेच्छतं।
सायुज्यादिमहाविष्णोर्विष्वक्सेनादिभिः सह ॥ २४१ ॥
२।७।१९ धारावराजपेन्मत्रं शतवारं जले यदा।
स्वमेन्द्रियंच द्रवतिमुच्यते पातकाद्द्विजः ॥ २४२ ॥
२।७।१९ द्यावोनस्तृभिर्मंत्रंच यदा धात्र्यां शतं जपेत्।
रेतः पतेद्भिमेदिन्यां तदा पापात्प्रमुच्यते ॥ २४३ ॥
२।७।१९ उक्षंते प्रजपेन्मंत्रं शतवारं दिनेदिने।
स्वस्त्रियामनृतौ गन्ता तस्मात्पापात्प्रमुच्यते ॥ २४४ ॥
२।७।१९ पृक्षेताविश्वामंत्रंतु बदर्यां प्रजपेच्छतं।
दिवास्वस्त्रीषु संगस्य तदा मुच्येत किल्बिषात्॥ २४५ ॥
२।७।१९ इन्धन्वभिर्जपेन्मंत्रं त्र्ययुतं किल्बिषंनहि।
रजस्वलास्वभार्यायाः संगश्चेन्नात्र संशयः ॥ २४६ ॥
२।७।२० आनोब्रह्माणिमंत्रंतु शतं दोषोजपेन्नहि।
स्वभार्यासंगकालेतु परस्त्रीस्मरणं यदा ॥ २४७ ॥
२।७।२० तन्नोदातजपेन्मंत्रं लक्षं पापं नसर्वथा।
प्रजावत्याः संगमश्च ज्ञानतोज्ञानतोयदा ॥ २४८ ॥

२।७।२० यद्युंजते जपेन्मंत्रं धात्र्यां पंचायुतं यदि।
कनिष्ठभ्रातृभार्यायाः संगमे किल्बिषं नहि ॥ २४९ ॥
२।७।२० योनोमरुतोमंत्रंच बदर्यां लक्षकं जपेत्।
दोषात्प्रमुच्यते सत्यं श्वश्रूणां संगमोयदि ॥ २५० ॥
२।७।२० चित्रंतद्वोजपेन्मंत्रमश्वत्थे लक्षकं द्विजः।
मातृष्वसुः संगदोषः प्रणश्यति न संशयः ॥ २५१ ॥
२।७।२१ तान्वोमह्वोजपेन्मंत्रं शतवारं दिनेदिने।
विन्दतेच धनं धान्यं सुकीर्तिं ब्रह्मवर्चसं ॥ २५२ ॥
२।७।२१ तेदशग्वाजपेन्मंत्रं शतवारं दिनेदिने।
अन्तकाले विष्णुतेजोलभते नात्र संशयः ॥ २५३ ॥
२।७।२१ तेक्षोणीभिर्जपेन्मंत्रं त्र्ययुतं विष्णुमन्दिरे।
यतमानस्य दानस्य चैत्रे दोषोनविद्यते ॥ २५४ ॥
२।७।२१ ताँइयानोजपेन्मंत्रं जले यदि सहस्रकं।
उत्क्रान्ते यस्यदानस्य किल्बिषं नास्ति सत्यतः॥२५५॥
२।७।२१ ययारध्रं जपेन्मंत्रं सहस्रंतु शिवालये।
गोदानस्य विमुच्येत वैतरण्याश्च किल्बिषात् ॥ २५६ ॥
४।७।६ संचत्वेतुजपेत्सूक्तं बदर्यां किल्बिषं नहि।
प्रायश्चित्तं माघमासे त्र्ययुतं स्वीकरोति चेत् ॥ २५७ ॥
७।७।६ कुहश्रुतोजपेत्सूक्तमश्वत्थे नरकोनहि।
ब्रह्मदंडंच गृह्णाति मार्गशीर्षे सहस्रकम् ॥ २५८ ॥
५।४।१७ स्नायाद्याः प्रवतोजम्वा चेमंमेगंगइत्यपि।
८।३।६ वापीकूपतडागादिनदीषु प्रार्थनंत्विदं ॥ २५९ ॥
६।३।४० अग्निःशुचिर्जपेन्मंत्रं शतवारं जले नहि।
पिशाचोद्देशभुक्तानि भुंजते भूसुरास्तदा ॥ २६० ॥

४ । ७ । ४ अपूर्व्याप्रजपेत्सूक्तं शतवारं दिनेदिने ।
विष्ण्वालये जले वापि क्रतूनां लभते फलं ॥ २६१ ॥
८ । ३ । २८ सम्राज्ञीतु जपेन्मंत्रं शतवारं दिनेदिने ।
पतिव्रता स्वभार्या सा दृष्टादृष्टप्रवर्धिनी ॥ २६२ ॥
८ । ३ । २३ सुकिंशुकं जपेन्मंत्रं शतवारं दिनेदिने ।
जननं मरणं नास्ति ततः सायुज्यमेतिसः ॥ २६३ ॥
८ । ३ । २८ इमांत्वमिन्द्रमंत्रं चदिनं प्रति जपेच्छतं ।
लभेत्पुत्रान् भाग्यवतोविदुषोदीर्घजीविनः ॥ २६४ ॥
८ । ३ । २८ समंजन्तुजपेन्मंत्रं शतवारं दिनेदिने ।
दंपत्योः प्रेममैत्रीच ज्यायसी ननिवर्तते ॥ २६५ ॥
७ । २ । १९ प्रदेवमच्छासूक्तंच जपेद्दश दिनेदिने ।
तद्गेहे गोधनं सत्यं धनंधान्यं चवर्धते ॥ २६६ ॥
२ । १ । १० दक्षिणावतामंत्रंच दिनं प्रति जपेच्छतं ।
भुवि स्थित्वा सुखं भुंक्ते परोक्षे विष्णुमाप्नुयात् ॥ २६७ ॥
८ । १ । ५ अहंभुवं जपेत्सूक्तमेकवारं यदा तदा ।
चौर्यवृत्त्यादिकात्पापान्मुच्यते नात्रसंशयः ॥ २६८ ॥
५ । ४ । २४ शुचीवस्तुजपेन्मंत्रं शतवारं दिनेदिने ।
स्पृष्टास्पृष्टं नदोषोस्ति शुचिर्भवति तत्क्षणात् ॥ २६९ ॥
३ । १ । २७ अग्निरस्मि जपेन्मंत्रं शतवारं दिनेदिने ।
नाग्निस्पृष्ट्वा भोजनान्ते दीपनं पाचनं भवेत् ॥ २७० ॥
३ । ३ । २८ उषसःपूर्वासूक्तंतु जपेल्लक्षं शिवालये ।
दत्तभूम्यपहारश्च नदोषश्चैव फाल्गुने ॥ २७१ ॥
८ । १ । ३० अधागावोजपेन्मंत्रं लक्षं बिल्वे शिवालये ।
क्षेत्रापहारनरकः प्रणश्यति न संशयः ॥ २७२ ॥

८।१।३० अधत्वमिन्द्रमंत्रंच प्रजपेच्छतलक्षकं।
सत्पात्रदत्तदानेन पश्चात्तापोन दोषभाक् ॥ २७३ ॥
९।१।३० अधयद्राजानामंत्रंच त्र्ययुतं फाल्गुनेजपेत्।
यस्मादुद्दिश्य दानंतु तस्मै दत्तंनकिल्बिषं ॥ २७४ ॥
१।७।५ अपनस्तुजपेन्मंत्रं सहस्रंवै जलेपिवा।
अज्ञातिभ्योग्निदानंच लिप्यते नैव किल्बिषात् ॥२७५॥
४।२।१९ तमुष्टुहिजपेन्मंत्रं त्रिवारंच दिनेदिने।
श्रीरुद्रस्यतु यत्पुण्यं तत्पुण्यं विन्दते जपात् ॥ २७६ ॥
८।७।१ तदिदासजपेन्मंत्रं शतवारं दिनेदिने।
मंत्रराजसमं सत्यं भुक्तिमुक्तिफलप्रदं ॥ २७७ ॥
८।७।१ तदिदासजपेत्सूक्तं शतवारं दिनेदिने।
नवतिःकोटिमंत्रैश्च यत्फलं लभते हितत् ॥ २७८ ॥
१।५।२९ इत्थाहिप्रजपेत्सूक्तं शतवारं दिनेदिने।
सुखेन भुंक्तेस्वहगृे पुत्रपौत्रादिभिः सह ॥ २७९॥
२।७।७ सुगोंहिवोजपेन्मंत्रं शतवारं दिनेदिने।
हृद्दुःखं नाशयेत्सर्वं सुखं सर्वत्र सर्वदा ॥ २८० ॥
२।७।७ प्रिपर्तुनोजपेन्मंत्रं शतवारंदिनेदिने।
शत्रुभ्यश्चागतं दुःखंनस्पृशेत्सर्वथा नरः ॥ २८१ ॥
२।६।१ विधेमते जपेन्मंत्रं शतवारं दिनेदिने।
कुर्यादेवाविचारेण अग्निपूजां दिनंप्रति ॥ २८२ ॥
१।६।३० इमंस्तोममर्हतेसूक्तं जपेच्चेत्र्ययुतंहरौ।
पित्रोर्विना ब्रह्मचारी वह्निदश्चेन्नपातकम् ॥ २८३ ॥
७।८।९ उषासानक्तासूक्तंतुजपेद्दशजलेपिवा।
प्रमादाज्ञानतोभुंक्ते सूतकान्नंनदोषभाक् ॥ २८४ ॥

७।८।२१ समानमुत्यं मंत्रंच सहस्रंतु यदाजपेत्।
शूद्रान्नंज्ञानतोभुंक्ते प्रमादाद्वानकिल्बिषम् ॥ २८५ ॥
७।८।२१ प्रातर्युजा जपेन्मंत्रमयुतं चेन्नपातकम्।
रजस्वलान्नं योभुंक्ते ज्ञानतोज्ञानतोपिवा ॥ २८६ ॥
७।८।२१ अध्वर्युवाजपेन्मंत्रं सहस्रं विमले जले।
गणकान्नं नरोभुंक्ते विमुच्येत सकिल्बिषात् ॥ २८७ ॥
७।८।२२ अस्तेवसुजपेन्मंत्रं सहस्रं वैनकल्मषं।
प्रमादाज्ञानतोभुंक्ते पतितान्नं यदा तदा ॥ २८८ ॥
७।८।२२ दोहेनगां जपेन्मंत्रमयुतं चेन्न कल्मषं।
ज्ञानतोज्ञानतोभुंक्ते पतितान्नं यदा तदा ॥ २८९ ॥
७।८।२२ किमंगत्वाजपेन्मंत्रमयुतं चेज्जले सुधीः।
ज्ञानतोज्ञानतोभुंक्ते कुष्ठयन्नं नैव कल्मषम् ॥ २९० ॥
७।८।२२ आजनायजपेन्मंत्रं शतवारं शिवालये।
क्षत्रियान्नं यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ २९१ ॥
७।८।२२ धनंनस्पंद्रंमंत्रंतु शतपंच जले जपेत्।
भुंक्ते यदातु वैश्यान्नं तदा पापात्प्रमुच्यते ॥ २९२ ॥
७।८।२३ यस्मिन्वयं जपेन्मंत्रं शतवारं दिनेदिने।
सदा परान्नभोक्ताच मुच्यते तेन किल्बिषात् ॥ २९३ ॥
७।८।२३ आराच्छत्रुंजपेन्मंत्रं शतवारं दिनेदिने।
मेदिनीं कांचनं गाश्च लभते शत्रुतोनरः ॥ २९४ ॥
७।८।२३ प्रथमंतश्चतुर्मंत्रान्तदा दश जले जपेत्।
वर्णातीतान्नभोक्तासौ तस्मात्पापात्प्रमुच्यते ॥ २९५ ॥
३।६।५ आयात्विन्द्रोजपेत्सूक्तमेकवारं शिवालये।

भुंक्तेभोक्ता ब्रह्मवधे विमुच्येत यदा तदा ॥ २९६ ॥

७ । ८ । २४ अच्छामइन्द्रं सूक्तं तदेकवारं दिनेदिने ।
विधुरान्नं यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ २९७ ॥

७ । ८ । २८ दिवस्परिजपेत्सूक्तमेकवारं जले शुचौ ।
पर्यायान्नं यदा भुंक्ते तदा पापाद्विमुच्यते ॥ २९८ ॥

४ । ३ । २४ प्रवःस्पळक्रं जपेत्सूक्तं विप्रोविष्णवालये दश ।
जारिण्यन्नंच भुक्तंच तदा पापात्प्रमुच्यते ॥ २९९ ॥

४ । ३ । २४ अमादेषां जपेन्मंत्रं दशवारं शिवालये ।
उदकुंभं सदा भुंक्ते कल्मषान्मुच्यते तदा ॥ ३०० ॥

४ । ३ । २४ गवामिव जपेन्मंत्रं शतवारं शिवालये ।
कुंडान्नंतु यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३०१ ॥

४ । ३ । २४ कोवोमहान्ति मंत्रंच शतवारं जपेद्बुधः ।
गोलकान्नं यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३०२ ॥

४ । ३ । २४ अश्वाइव जपेन्मंत्रं दशवारं जले यदा ।
नित्यश्राद्धं यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३०३ ॥

४ । ३ । ४४ तेअज्येष्ठाजपेन्मंत्रं दश विष्णवालये सकृत् ।
दिवा द्विर्भोजनं भुक्त्वा किल्बिषाच्चैव सर्वदा ॥ ३०४ ॥

४ । ३ । २४ मिमातुद्यौर्जपेन्मंत्रं शतवारं शिवालये ।
भार्यायुक्तोयदा भुंक्ते तदा मुच्येत किल्बिषात् ॥ ३०५ ॥

४ । । ३ २५ ईळेअग्निं जपेन्मंत्रं दशवारं यदा तदा ।
पंचयज्ञविहीनस्य गृहे भुंक्ते नपातकम् ॥ ३०६ ॥

४ । ३ । २५ आयेतस्थुर्जपेन्मंत्रं दश वै विष्णुमंदिरे ।
हस्ते दत्तं यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३०७ ॥

४ । ३ । २५ पर्वतश्चिज्जपेन्मंत्रं शतवारं नकल्मषं ।

यत्यन्नं तु यदा भुंक्ते पात्रस्थं प्रेरितं यदा ॥ ३०८ ॥
४ । ३ । २५ वराइवेजपेन्मंत्रं शतवारं यदा तदा ।
बहवश्चैकपात्रेतु भुंजते चेन्न कल्मषं ॥ ३०९ ॥
४ । ३ । २५ अज्येष्ठासोजपेन्मंत्रं दशवारं नकल्मषं ।
श्वादीनां दर्शनं कृत्वा पश्चाद्भुंक्ते यदा तदा ॥ ३१० ॥
४ । ३ । २५ यदुत्तमेजपेन्मंत्रं दशवारं यदा तदा ।
रजस्वलाध्वनिं श्रुत्वा पश्चाद्भुंक्ते नकिल्विषं ॥ ३११ ॥
४ । ३ । २५ अग्निश्चयज्जपेन्मंत्रं दशवारं विशेषतः ।
अंत्यजानां ध्वनिं श्रुत्वा पश्चाद्भुंक्ते नपातकम् ॥ ३१२ ॥
४ । ४ । २५ अग्नेमरुद्भिर्मंत्रंच किल्विषं न शतं जपेत् ।
भुंजते सहपात्रेतु बहवोब्रह्मचारिणः ॥ ३१३ ॥
४ । ३ । २६ केष्ठानरोजपेत्सूक्तमेकवारं प्रशस्तकं ।
मन्वादिश्राद्धभोक्ताच तदा पापात्प्रमुच्यते ॥ ३१४ ॥
४ । ३ । ३० ऋतेनऋतं सूक्तंच एकवारं जपेद्बुधः ।
युगादिश्राद्धभोक्ताच तदा पापात्प्रमुच्यते ॥ ३१५ ॥
४ । ३ । २३ तमुनूनं जपेन्मंत्रं दशवारं शिवालये ।
अष्टकाश्राद्धभोक्ता चतदा पापात्प्रमुच्यते ॥ ३१६ ॥
४ । ३ । २३ त्वेषंगणंजपेन्मंत्रं दशवै विष्णुमन्दिरे ।
व्यतीपाते यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३१७ ॥
४ । ३ । २३ आवोयंतु जपेन्मंत्रं दशवारं विनागुरोः ।
उच्छिष्टभोजी पापेन मुच्यते सर्वथा तदा ॥ ३१८ ॥
४ । ३ । २३ यूयंराजानमितिच दशवारं जपेदृचं ।
वृद्धिश्राद्धे यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३१९ ॥
४ । ३ । २३ अराइवेज्जपेन्मंत्रं दशवारं नसंशयः ।

सीमंतेच यदा भुंक्ते मुच्यते किल्षात्तदा ॥ ३२० ॥

४ । ३ । २३ यत्प्रायासिष्टमंत्रंच शतवारं शिवालये ।
अभिशस्ते यदा भुंक्ते कल्मषाद्वै विमुच्यते ॥ ३२१ ॥

४ । ३ । २३ प्रथिष्टयामन्मंत्रं च दशवारं शिवालये ।
सूत्याहनि यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३२२ ॥

४ । ३ । २३ हयेनरोजपेन्मंत्रं पंचाशद्विष्णुमंदिरे ।
यज्ञशाले यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३२३ ॥

१ । ४ । ११ मंदिष्टयजपेन्मंत्रं शतवारं जले यदा ।
पुनर्भुवोयदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३२४ ॥

१ । ४ । ११ आस्मारथंजपेन्मंत्रमयुतंचेन्न कल्मषं ।
भुक्तिकालेंत्यजं स्पृष्ट्वा ज्ञानतोज्ञानतोपिवा ॥ ३२५ ॥

१ । ४ । ११ अददाअर्भांमंत्रंच सहस्रं चेन्न कल्मषं ।
शय्याप्रतिग्रही पापान्मुच्यते नात्र संशयः ॥ ३२६ ॥

१ । ४ । ११ इंद्रोअश्रायिमंत्रंच अयुतं वै न दुष्कृतं ।
ज्ञानतोप्यन्यथा दृष्ट्वा भुक्तिकाले रजःस्त्रियः ॥ ३२७ ॥

१ । ४ । १२ त्यंसुमेषंजपेन्मंत्रं दशवारं शिवालये ।
अष्टम्यांवा चतुर्दश्यां दिवा भुंक्ते नपातकम् ॥ ३२८ ॥

१ । ४ । १२ सपर्वतोजपेन्मंत्रं संक्रांतौ दश चेज्जले ।
पर्वद्वये भानुवारे रात्रौ भुंक्ते नकल्मषम् ॥ ३२९ ॥

१ । ४ । १२ सहिद्वरोजपेन्मंत्रं शतं चेद्विष्णुमंदिरे ।
एकादश्यामहोरात्रं भुंक्ते यदि नकल्मषम् ॥ ३३० ॥

१ । ४ । १२ आयंपृणंति मंत्रंच शतवारं नकल्मषं ।
रात्रौ भुंक्ते वत्सरेषु मन्वादिषु युगादिषु ॥ ३३१ ॥

१ । ४ । १२ अभिस्वदृष्टिमंत्रं च जपेद्दश नपातकम् ।

रात्रौ भुंक्ते वत्सरेभ्यः परान्नं भुंजते यदि ॥ ३३२ ॥
१ । ४ । १३ परींघृणाजपेन्मंत्रं दशवारं जलेपिवा ।
श्राद्धे भुंक्ते याचितान्नं तदा पापात्प्रमुच्यते ॥ ३३३ ॥
१ । ४ । १३ ह्रदंनहिजपेन्मंत्रं शतवारं नपातकम् ।
स्तेनभुंक्ते श्राद्धभोक्ता श्राद्धकर्ता गतस्तदा ॥ ३३४ ॥
१ । ४ । १३ जघन्वाँउजपेन्मंत्रं शतवारं यदा तदा ।
याश्चया श्राद्धकर्तासौ तदा पापात्प्रमुच्यते ॥ ३३५ ॥
१ । ४ । १३ बृहत्स्वश्वंद्रमंत्रंच सहस्रंतु जलाशये ।
अभक्त्या श्राद्धकर्तासौ तदा पापात्प्रमुच्यते ॥ ३३६ ॥
१ । ४ । १३ द्यौश्चिदस्यजपेन्मंत्रं शतवारं प्रशस्तकं ।
अकाले श्राद्धकर्तासौ मुच्यते पातकात्तदा ॥ ३३७ ॥
१ । ४ । १४ यदिन्विन्द्रजपेन्मंत्रं शतवारं नकल्मषं ।
पैतृकं दिनमुद्दिश्य त्वन्यस्मिंश्चेद्दिने कृतम् ॥ ३३८ ॥
१ । ४ । १४ त्वमस्यपारेमंत्रंच जपेन्माघे युतं तदा ।
अब्दश्राद्धे यदा नूनं स्वरूपं कल्मषं नहि ॥ ३३९ ॥
१ । ४ । १४ त्वंभुवःप्रजपेन्मंत्रं दशवारं जले यदा ।
मन्वादयो यदा न्यूनास्तदा पापात्प्रमुच्यते ॥ ३४० ॥
१ । ४ । १४ नयस्यद्यावो मंत्रंच शतवारं तदा जपेत् ।
युगादयोयदा न्यूनाः कुरुतेवै नसंशयः ॥ ३४१ ॥
१ । ४ । १४ आर्चन्नत्रजपेन्मंत्रं शतवारं जले बुधः ।
नित्यश्राद्धं यदान्यूनं कुरुते नात्र संशयः ॥ ३४२ ॥
१ । ४ । १५ न्यूषुवाचं जपेन्मंत्रं शतवारं तुतद्दिने ।
अमाश्राद्धं यदा नास्ति तदा संपूर्णमेवतत् ॥ ३४३ ॥
१ । ४ । १५ दुरोअश्वस्यमंत्रंच शतवारं द्विमासिके ।

महालयं यदा न्यूनं तदा संपूर्णमेवतत् ॥ ३४४ ॥
१ । ४ । १५ शचीवइन्द्रजपेन्मंत्रं दशवारं दिनेदिने ।
बहुद्रव्यंचसिद्धिंच विन्दते ब्रह्मवर्चसम् ॥ ३४५ ॥
१ । ४ । १५ एभिर्द्युभिर्जपेन्मंत्रं शतवारं दिनेदिने ।
अन्वष्टका यदा न्यूना संपूर्णा याति सर्वथा ॥ ३४६ ॥
१ । ४ । १५ समिन्द्रायामंत्रंतु वर्षेवर्षे जपेच्छतम् ।
आग्रयणंच यदा न्यूनं तदा संपूर्णमेवतत् ॥ ३४७ ॥
५ । ४ । ३० मृत्युंजयार्थे गोदानं गृहीत्वा त्र्ययुतं जपेत् ।
व्याहृतीसंपुटं तारं त्र्यक्षं मृत्युं तरिष्यति ॥ ३४८ ॥
१ । २ । ७ देवतार्थंतु गोदानं गृहीत्वानंतदोषकृत् ।
तथापि प्रजपेद्दुर्गानतोदेवास्त्रयः शुभम् ॥ ३४९ ॥
व्याहृतीसंपुटं तारं गायत्रीमयुतं जपेत् ।
अनडुहं प्रतिगृह्य मुच्यते कल्मषात्तदा ॥ ३५० ॥
ओष्ठापिधानामंत्रंच जपेद्दश दिनंप्रति ।
एकबुद्धिः सदा तस्य महाविष्णौ प्रवर्तते ॥ ३५१ ॥
८ । ६ । १६ सुपर्णविप्रामंत्रंच दिनंप्रति जपेद्दश ।
वाग्देवी मातृका तस्य जिह्वाग्रे वर्तते सदा ॥ ३५२ ॥
८ । ३ । १६ विश्वतश्चक्षुर्मंत्रंच जपेद्दश दिनंप्रति ।
बहुधा कल्पना बुद्धेरेकस्मिन्नात्मनि स्थिता ॥ ३५३ ॥
ओष्ठमंत्रेण जुहुयाद्विद्याश्रीस्तत्कुले स्थिता ।
त्रिमधुचाष्टसाहस्रं प्रतिवर्षंतु फाल्गुने ॥ ३५४ ॥
२ । २ । २६ तमुस्तोतारोमंत्रंच दिनंप्रति जपेद्दश ।
मूलाविद्या नसंस्पृष्टा जीवन्मुक्तोनसंशयः ॥ ३५५ ॥
८ । ६ । १६ घर्मासमंतामंत्रंच शतं जप्त्वा यदा तदा ।

यतीच ब्रह्मचारीच मुक्तिकाले नकल्मषम् ॥ ३५६ ॥
८।६।१६ तिस्रोदेष्ट्रायमंत्रंच प्रजपेत्प्रत्यहं शतं ।
तापत्रयं नृणां नास्ति सुखं सर्वत्र सर्वदा ॥ ३५७ ॥
८।६।१६ चतुष्कपर्दामंत्रंच दिनं प्रति जपेच्छतं ।
द्वंद्वातीतः सुखी शांतोनिरसूयोनपेक्षकः ॥ ३५८ ॥
८।६।१६ एकःसुपर्णोमंत्रंच दिनं प्रतिजपेद्दश ।
किंचिन्नास्ति पृथग्बुद्धिः परमात्मनि संस्थिता॥ ३५९ ॥
तंवोदस्मजपेन्मंत्रं त्रिंशद्वारं दिनेदिने ।
रागद्वेषौ तदा नस्तः चित्तशुद्धिर्भवेत्ततः ॥ ३६० ॥
५।४।१ प्रब्रह्मैतुजपेन्मंत्रं शतवारं दिनेदिने ।
विषयेषु जुगुप्साच ब्रह्मज्ञानं भवेत्ततः ॥ ३६१ ॥
१।८।६ मानस्तोके जपेन्मंत्रं शतवारं शिवालये ।
अग्निकार्यं विना भुंक्ते नपापं ब्रह्मचारिणः ॥ ३६२ ॥
३।५।९ अग्नेमृळजपेन्मंत्रं शतवारं यदा तदा ।
औपासनं विना भुंक्ते गृहस्थस्य नकल्मषम् ॥ ३६३ ॥
२।२।२६ भवामित्रोजपेन्मंत्रं शतवारं दिनेदिने ।
आधिर्नसंस्पृशेत्सत्यं विद्यया सह तिष्ठति ॥ ३६४ ॥
२।२।२६ यःपूर्व्यायजपेन्मंत्रं शतवारं दिनेदिने ।
जीवबुद्धिः सदा नास्ति स्वात्मन्येव स्थिता ततः ॥३६५॥
७।५।२५ नानानंवैजपेत्सूक्तं दशवारं दिनेदिने ।
अब्दं मासं दिनं वापि नान्येषां स्वस्य वै लयम्॥ ३६६॥
८।१।७ अहमत्कंजपेन्मंत्रं शतवारं दिनं प्रति ।
त्रिकालज्ञानसिद्धिंच सर्वथा विन्दते द्विजः ॥ ३६७ ॥
८।१।७ अहंदांप्रजपेन्मंत्रं शतवारं दिनेदिने ।

तदा मृत्युभयं नास्ति संस्थितः परमात्मनि ॥ ३६८ ॥

६ । २ । ३५ येत्रिंशतिजपेत्सूक्तं त्रिंशद्वारं यदा ततः ।
वैश्वदेवं विना भुंक्ते तदा पापात्प्रमुच्यते ॥ ३६९ ॥

८ । २ । ६ कथादेवानांमंत्रंच दिनं प्रति शतं जपेत् ।
प्रारब्धसूचितं कर्म प्रणश्यति नसंशयः ॥ ३७० ॥

८ । २ । ६ क्रतूयंतिजपेन्मंत्रं शतवारं दिनेदिने ।
आगामिकंवै प्रारब्धं प्रणश्यति नसंशयः ॥ ३७१ ॥
मूर्खोवा पंडितोवापि नारीवा देवएववा ।
प्रारब्धं वर्तमानंतु भोगादेव प्रणश्यति ॥ ३७२ ॥

७ । ४ । १६ देवाव्योनोजपेन्मंत्रं शतवारं दिनेदिने ।
यदृच्छालाभसंतुष्टोपृथिव्यां वर्तते द्विजः ॥ ३७३ ॥

७ । ४ । १६ एवादेवजपेन्मंत्रं शतवारं दिनेदिने ।
देवतानां स्वालयस्य तृष्णानास्ति सदा सुखी ॥ ३७४ ॥

५ । ४ । १७ याःप्रवतोजपेन्मंत्रं शतवारं यदा तदा ।
नदीमुलंघ्य यत्स्नानं तस्माद्दोषान्नलिप्यते ॥ ३७५ ॥

२ । २ । २७ युवंहगर्भमंत्रंच शतवारं जले यदि ।
श्राद्धकर्ता पुनर्भुंक्ते कल्मषान्मुच्यते तदा ॥ ३७६ ॥

४ । २ । २८ हयोनप्रजपेत्सूक्तं सहस्रं चेज्जलेपिवा ।
प्रायश्चित्तं स्वीकरोति तदा पापात्प्रमुच्यते ॥ ३७७ ॥

२ । ६ । १५ प्रघान्वस्यजपेत्सूक्तं त्रिंशतं वैनकल्मषं ।
भूसुरेभ्योभुक्तिकाले पंक्तिभेदं करोतिचेत् ॥ ३७८ ॥

२ । २ । २५ प्रवःपांतंजपेत्सूक्तं सहस्रं विष्णुमंदिरे ।
कृतघ्नान्नं यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३७९ ॥
शतवारंतु गायत्रीं व्याहृत्या तारसंपुटं ।

किल्विषान्नं यदा भुंक्तेदोषोनास्ति तदा जपेत् ॥३८०॥

४।८।१ यज्ञायज्ञाजपेत्सूक्तमेकं धात्र्यां जलेपिवा।
गणान्नंतु यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ ३८१ ॥

४।८।५ स्तुषेजनंजपेद्वर्गं शतं धात्र्यां जलेथवा।
स्वामिद्रोही गृहे भुंक्ते पातकान्मुच्यते तदा ॥ ३८२ ॥

४।८।६ पर्जन्यवातावर्गंच शतवारं जपेद्यदि।
मित्रद्रोहीगृहे भुंक्ते पातकान्मुच्यते तदा ॥ ३८३ ॥

४।८।७ आयुवानस्तुवर्गंच शतवारं जले यदि।
दीर्घरोगिगृहे भुंक्ते तदा पापात्प्रमुच्यते ॥ ३८४ ॥

४।८।८ हुवेवोदेवींवर्गंच बदर्यां त्रिशतं जपेत्।
पिशुनस्य गृहे भुंक्ते मुच्यते पातकात्तदा ॥ ३८५ ॥

४।८।९ अभित्यंवीरंवर्गंच शतवारं जलेपिवा।
असूयकगृहे भुंक्ते पापान्मुच्येत सर्वथा ॥ ३८६ ॥

४।८।१० तेनोरायोजपेन्मंत्रं शतवारं शिवालये।
अकार्यादिगृहे भुंक्ते मुच्यते पातकात्तदा ॥ ३८७ ॥

४।८।११ उदुत्यंप्रजपेन्मंत्रं शतवारं जले यदा।
अकुलस्य गृहे भुंक्ते तदा पापात्प्रमुच्यते ॥ ३८८ ॥

४।८।१२ मानोवृकायवर्गंच शतं विष्णवालये जपेत्।
द्वेष्यभक्तं यदा भुंक्ते तदा दोषात्प्रमुच्यते ॥ ३८९ ॥

४।८।१३ तेनइन्द्रो जपेद्वर्गं शतवारं शिवालये।
कुंजरघ्नगृहे भुंक्ते कल्मषान्मुच्यते तदा ॥ ३९० ॥

४।८।१४ नतद्दिवाजपेन्मंत्रं शतवारं जले यदा।
हयघ्नस्य गृहे भुंक्ते तदा मुच्येत कल्मषात् ॥ ३९१ ॥

४।८।१५ इन्द्रोनेदिष्ठं वर्गंच शतं गोष्ठे जपेद्बुधः ।
गोघ्नस्य चगृहे भुंक्ते मुच्यते पातकात्तदा ॥ ३९२ ॥
४।८।१६ स्तोत्रमिन्द्रोजपेद्वर्गं शतवारं जलेपिवा ।
कुष्ठ्यन्नमात्रं भुंक्तेतु तदा पापात्प्रमुच्यते ॥ ३९३ ॥
४।८।२१ एहिवांप्रजपेत्सूक्तं सहस्रं विष्णुमन्दिरे ।
ब्रह्मघ्नस्य गृहे भुंक्ते तदा मुच्येत कल्मषात् ॥ ३९४ ॥
४।८।२२ यएनंप्रजपेत्सूक्तं सहस्रं विष्णुमन्दिरे ।
पापात्प्रमुच्यते सत्यं भुंक्ते गेहे सुरापिणः ॥ ३९५ ॥
४।८।२३ इन्द्रानुप्रजपेत्सूक्तं सहस्रं चेज्जले यदा ।
स्वर्णस्तेयगृहे भुंक्ते तदा पापात्प्रमुच्यते ॥ ३९६ ॥
४।८।२४ शुक्रंतेप्रजपेत्सूक्तं शिवस्थाने सहस्रकं ।
तल्पगस्य गृहे भुंक्ते तदा पापात्प्रमुच्यते ॥ ३९७ ॥
४।८।२५ प्रनुवोचाजपेत्सूक्तं सहस्रं विष्णुमन्दिरे ।
तत्संयोगिगृहे भुंक्ते तदा मुच्येत कल्मषात् ॥ ३९८ ॥
४।८।२७ श्नथद्वृत्रंजपेत्सूक्तमेकवारं दिनेदिने ।
उदरं पाणिना मृज्य जीवेद्वा ह्यगदः सुखी ॥ ३९९ ॥
८।१।१० महत्तदुल्बंजपेत्सूक्तं पंचवारं दिनेदिने ।
परान्नकं सदानास्ति नित्यं स्वान्ने स्थिरामतिः ॥४००॥
७।४।१३ शंनोभवेतिद्वाभ्यांतु भुक्त्वान्नं प्रयतः शुचिः ।
उदरं पाणिना स्पृष्ट्वा ज्योग्जीवेदगदः सुखी ॥ ४०१ ॥
७।४।१९ महत्तत्प्रजपेत्सूक्तं पंचवारं दिनेदिने ।
औपासनं यदा भुंक्ते नस्पृशेद्विधुरंततः ॥ ४०२ ॥
२।५।१० अग्नेनयजपेद्वर्गं पंचवारं दिनेदिने ।
विधुरोवा साग्निकस्य यत्फलं तत्फलं लभेत् ॥ ४०३ ॥

७।४।१६ जपेदश्वोनमंत्रंच शतवारं जले यदा।
अश्वविक्रयिणोगेहे तस्मात्पापात्प्रमुच्यते ॥ ४०४ ॥
७।४।१६ शतंधाराजपेन्मंत्रं शतवारं शिवालये।
